प्रमाणसिद्धिनामा

प्रथम: परिच्छेद:

मङ्गलम्

विधूतकल्पनाजालगम्भीरोदारमूर्तये।
नम: समन्तभद्राय समन्तस्फरणत्विषे।।1।।

{अनुबन्धचतुष्टयनिरूपणम्}

प्राय: प्राकृतसक्तिरप्रतिबलप्रज्ञो जन: केवलम्।
नानर्थ्येव सुभाषितै: परिगतो विद्वेष्ट्यपीर्ष्यामलै:।
तेनायं न परोपकार इति नश्चिन्तापि चेतश्चिरम्*।
सूक्ताभ्यासविवर्धितव्यसनमित्यत्रानुबद्धस्पृहम्।।2।। (पा0टि0- *चेतस्तत:-रा0)

{प्रमाणलक्षणम्}

{1- अविसंवादिज्ञानं प्रमाणम्;}

प्रमाणमविसंवादिज्ञानम्;

{अविसंवादनशब्दनिरुक्ति: }

अर्थक्रियास्थिति:।

{अविसंवादनम्; }

{शाब्दे ज्ञानेऽपि प्रामाण्यम्}

शाब्देऽप्यभिप्रायनिवेदनात्।।3।।
वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते।
प्रामाण्यं तत्र शब्दस्य, नार्थतत्त्वनिबन्धनम्।।4।।
गृहीतग्रहणान्नेष्टं सांवृतम्, धीप्रमाणता।
प्रवृत्तेस्तत्प्रधानत्वात् हेयोपादेयवस्तुनि।।5।।
विषयाकारभेदाच्च धियोऽधिगमभेदत:।
भावादेवास्य तद्भावे;

{मीमांसकमतखण्डनम्}

स्वरूपस्य स्वतो गति:।। 6 ।।
प्रामाण्यं व्यवहारेण;

{शास्त्रप्रणयनफलम्}

शास्त्रं मोहनिवर्तनम्।

{2- अज्ञातार्थप्रकाशकं ज्ञानं प्रमाणम्}

अज्ञातार्थप्रकाशो वा;

{सामान्यज्ञानेऽप्रामाण्यम्}

स्वरूपाधिगते: परम्।। 7 ।।

प्राप्तं सामान्यविज्ञानम्, अविज्ञाते स्वलक्षणे।

यज्ज्ञानमित्यभिप्रायात्; स्वलक्षणविचारत:।। 8 ।।

{भगवति प्रामाण्यम्}

तद्वत् प्रमाणं भगवान्; अभूतविनिवृत्तये।

भूतोक्ति:; साधनापेक्षा ततो युक्ता प्रमाणता।। 9 ।।

{ईश्वरादावप्रामाण्यम्}

{नित्येऽप्रामाण्यम्}

नित्यं प्रमाणं नैवास्ति प्रामाण्यात्; वस्तुसद्गते*:।।

ज्ञेयानित्यतया तस्या अध्रौव्यात्; क्रमजन्मनाम्।। 10 ।।(पा0टि0-*वस्तुसङ्गते:-रा0।)

नित्यादुत्पत्तिविश्लेषादपेक्षाया अयोगत:।

कथञ्चिन्नोपकार्यत्वात्;

{अनित्येऽप्यप्रामाण्यम्}

अनित्येऽप्यप्रमाणता।।11।।

{ईश्वरसाधनदूषणम्}

{1- नैयायिकमतखण्डनम्}

स्थित्वा प्रवृत्ति:संस्थानविशेषार्थक्रियादिषु।

इष्टसिद्धि:; असिद्धिर्वा दृष्टान्ते संशयोऽथवा।। 12 ।।

सिद्धं यादृगधिष्ठातृभावाभावानुवृत्तिमत्।

सन्निवेशादि; तद्युक्तं तस्माद् यदनुमीयते।। 13।।

वस्तुभेदे प्रसिद्धस्य शब्दसाम्यादभेदिन:।

न युक्तानुमिति: पाण्डुद्रव्यादिव* हुताशने।। 14।।

(पा0टि0- *पाण्डुद्रव्यादिवद्-रा0। एवमेव टीकायामपि।)

अन्यथा कुम्भकारेण मृद्विकारस्य कस्यचित्।

घटादे: करणात् सिध्येद् वल्मीकस्यापि तत्कृति:।। 15।।

साध्येनानुगमात् कार्ये सामान्येनापि साधने।

सम्बन्धिभेदाद् भेदोक्तिदोष: कार्यसमो मत:।। 16।।

जात्यन्तरे प्रसिद्धस्य शब्दसामान्यदर्शनात्।

न युक्तं साधनं गोत्वाद् वागादीनां विषाणिवत्।। 17।।

विवक्षापरतन्त्रत्वान्न* शब्दा: सन्ति कुत्र वा।

तद्भावादर्थसिद्धौ तु सर्वं सर्वस्य सिध्यति।। 18।।(पा0टि0- *तदभावाद्; अर्थ0-रा0।)

{2- साङ्ख्यमतखण्डनम्}

एतेन कापिलादीनामचैतन्यादि चिन्तितम्।
अनित्यादेश्च चैतन्यं मरणात् त्वगपोहत:।। 19।।
वस्तुस्वरूपेऽसिद्धेऽयं न्याय: सिद्धे विशेषणम्।
अबाधकमसिद्धावप्याकाशाश्रयवद् ध्वने:।।20।।
असिद्धावपि शब्दस्य सिद्धे वस्तुनि सिद्ध्यति।
औलूक्यस्य यथा बौद्धेनोक्तं मूर्त्त्यादिसाधनम्।।21।।
तस्यैव व्यभिचारादौ शब्देऽप्यव्यभिचारिणि।
दोषवत् साधनं ज्ञेयं वस्तुनो वस्तुसिद्धित:।।22।।

{ईश्वरबाधकं प्रमाणम्}

यथा तत् कारणं वस्तु तथैव तदकारणम्।
यदा तत् कारणं केन मतं नेष्टमकारणम्।।23।।
शस्त्रौषधाभिसम्बन्धाच्चैत्रस्य व्रणरोहणे।
असम्बद्धस्य किं स्थाणो: कारणत्वं न कल्प्यते।।24।।
स्वभावभेदेन विना व्यापारोऽपि न युज्यते।
नित्यस्याव्यतिरेकित्वात् सामर्थ्यं च दुरन्वयम्।।25।।
येषु सत्सु भवत्येव यत् तेभ्योऽन्यस्य कल्पने।
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थिति:।।26।।
स्वभावपरिणामेन हेतुरंकुरजन्मनि।
भूम्यादिस्तस्य संस्कारे तद्विशेषस्य दर्शनात्।।27।।
यथा विशेषेण विना विषयेन्द्रियसंहति:।
बुद्धेर्हेतुस्तथेदं चेन्न तत्रापि विशेषत:।।28।।
पृथक् पृथगशक्तानां स्वभावातिशयेऽसति।
संहतावप्यसामर्थ्यं स्यात् सिद्धोऽतिशयस्तत:।।29।।
तस्मात् पृथगशक्तेषु येषु सम्भाव्यते गुण:।
संहतौ हेतुता तेषां नेश्वरादेरभेदत:।।30।।

{1- ज्ञानवत्त्वाद् भगवान् प्रमाणम्}

{मीमांसकमतखण्डनम्}

प्रामाण्यञ्च परोक्षार्थज्ञानं तत्साधनस्य च।
अभावान् नास्त्यनुष्ठानमिति केचित् प्रचक्षते।।31।।
ज्ञानवान् मृग्यते कश्चिद् तदुक्तप्रतिपत्तये।
अज्ञोपदेशकरणे विप्रलम्भनशङ्किभि:।।32।।

तस्मादनुष्ठेयगतं ज्ञानमस्य विचार्यताम्।
कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते !।।33।।

{2- हेयोपादेयवेदकत्वादेव भगवान् प्रमाणम्}

हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः।।34।।
दूरं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु।
प्रमाणं दूरदर्शी चेदेत गृध्रानुपास्महे !।।35।।

{3- कारुणिकत्वादपि भगवान् प्रमाणम्}

{चार्वाकमतनिरसनपूर्वकं परलोकसाधनम्}

साधनं करुणाभ्यासात् सा; बुद्धेर्देहसंश्रयात्।
असिद्धोऽभ्यास इति चेन्नाश्रयप्रतिषेधतः।।36।।
प्राणापानेन्द्रियधियां देहादेव न केवलात्।
सजातिनिरपेक्षाणां जन्म जन्मपरिग्रहे।।37।।
अतिप्रसङ्गात्; यद् दृष्टं प्रतिसन्धानशक्तमित्।
किमासीत् तस्य यन्नास्ति पश्चाद् येन न सन्धिमत्।।38।।
न स कश्चित् पृथिव्यादेरंशो यत्र न जन्तवः।
संस्वेदजाद्या जायन्ते सर्वं बीजात्मकं ततः।।39।।
तत् सजात्यनपेक्षाणामक्षादीनां* समुद्भवे।
परिणामो यथैकस्य स्यात् सर्वस्याविशेषतः।।40।। (पा0टि0-* स्वजात्य0—रा0)
प्रत्येकमुपघातेऽपि नेन्द्रियाणां मनोमतेः।
उपघातोऽस्ति; भङ्गेऽस्यास्तेषां भङ्गश्च दृश्यते।।41।।
तस्मात् स्थित्याश्रयो बुद्धेर्बुद्धिमेव समाश्रितः।
कश्चिन्निमित्तमक्षाणां तस्मादक्षाणि बुद्धितः।।42।।
यादृश्याक्षेपिका साऽसीत् पश्चादप्यस्तु तादृशी।
तज्ज्ञानैरुपकार्यत्वादुक्तं कायाश्रितं मनः।।43।।
यद्यप्यक्षैर्विना बुद्धिर्न तान्यपि तया विना।
तथाप्यन्योऽऽन्यहेतुत्वं ततोऽप्यन्योऽन्यहेतुके।।44।।

{विज्ञानसिद्धिः}

नाक्रमात् क्रमिणो भावो नाप्यपेक्षाऽविशेषिणः।
क्रमाद् भवन्ती धीः कायात् क्रमन्तस्यापि* शंसति।।45।। (पा0टि0-*क्रमं तस्यापि0-रा0।)
प्रतिक्षणमपूर्वस्य पूर्वः पूर्वः क्षणो भवेत्।
तस्य हेतुरतो हेतुर्दृष्ट एवास्तु सर्वदा।।46।।

चित्तान्तरस्य सन्धाने को विरोधोऽन्त्यचेतस:।
तद्वदप्यर्हतश्चित्तमसन्धानं कुतो मतम्।।47।।
असिद्धार्थ: प्रमाणेन किं सिद्धान्तोऽनुगम्यते।
हेतोर्वैकल्यतस्तच्चेत् किं तदेवाऽत्र नोदितम्।।48।।
तद्धीवद् ग्रहणप्राप्तेर्मनोज्ञानं न सेन्द्रियात्।
ज्ञानोत्पादनसामर्थ्यभेदान्न सकलादपि।।49।।
अचेतनत्वान्नन्यस्माद्; हेत्वभेदात् सहस्थिति:।
अक्षवद् रूपरसवद् अर्थद्वारेण विक्रिया।।50।।
सत्तोपकारिणी यस्य नित्यं तदनुबन्धत:।
स हेतु: सप्तमी तस्मादुत्पादादिति चोच्यते।।51।।
अस्तूपकारको वापि कदाचिच्चित्तसन्तते:।
वहनयादिवद् घटादीनां विनिवृत्तिर्न तावता।।52।।
अनिवृत्तिप्रसङ्गश्च देहे तिष्ठति चेतस:।
तद्भावभावाद् वश्यत्वात् प्राणापानौ ततो न तत्।।53।।
प्रेरणाकर्षणे वायो: प्रयत्नेन विना कुत:।
निर्ह्रासातिशयापत्तिर्निर्ह्रासातिशयात् तयो:।।54।।
तुल्य: प्रसङ्गोऽपि तयो:; न तुल्यं चित्तकारणे।
स्थित्यावेधकमन्यच्च यत: कारणमिष्यते।।55।।
न दोषैर्विगुणो देहो हेतुर्वर्त्यादिवद् यदि।
मृते शमीकृते दोषे पुनरुज्जीवनं भवेत्।।56।।
निवृत्तेऽप्यनले काष्ठविकाराविनिवृत्तिवत्।
तस्यानिवृत्तिरिति चेन्न चिकित्साप्रयोगत:।।57।।
अपुनर्भावत: किञ्चिद् विकारजननं क्वचित्।
किञ्चिद् विपर्ययादग्निर्यथा काष्ठसुवर्णयो:।।58।।
आद्यस्याल्पोऽप्यसंहार्य: प्रत्यानेयस्तु यत्कृत:।
विकार: स्यात् पुनर्भाव: तस्य हेम्नि खरत्ववत्।।59।।
दुर्लभत्वात् समाधातुरसाध्यं किञ्चिदीरितम्।
आयु:क्षयाद् वा; दोषे तु केवले नास्त्यसाध्यता।।60।।
मृते विषादिसंहारात् तद्वंशच्छेदतोऽपि वा।
विकारहेतोर्विगमे स नोच्छ्वसिति किं पुन:।।61।।
उपादानाविकारेण नोपादेयस्य विक्रिया।
कर्तुं शक्याऽविकारेण मृद: कुण्डादिनो यथा।।62।।

अविकृत्य हि यद् वस्तु य: पदार्थो विकार्यते।
उपादानं न तत् तस्य युक्तं गोगवयादिवत्।।63।।
चेत:शरीरयोरेवम्, तद्धेतो: कार्यजन्मन:।
सहकारात् सहस्थानमग्निताम्रद्रवत्ववत्।।64।।
अनाश्रयात् सदसतोर्नाश्रय: स्थितिकारणम्।
सतश्चेदाश्रयो नास्या: स्थातुरव्यतिरेकत:।।65।।
व्यतिरेकेऽपि तद्धेतुस्तेन भावस्य किं कृतम्।
अविनाशप्रसङ्ग: स नाशहेतोर्मतो यदि।।66।।
तुल्य: प्रसङ्गस्तत्रापि; किं पुन: स्थितिहेतुना।
आ नाशकागमात् स्थानं ततश्चेद् वस्तुधर्मता।।67।।
नाशस्य; सत्यबाधोऽसाविति किं स्थितिहेतुना।
यथा जलादेराधार इति चेत् तुल्यमत्र च।।68।।
प्रतिक्षणविनाशे हि भावानां भावसन्तते:।
तथोत्पत्ते: सहेतुत्वादाश्रयोऽयुक्तमन्यथा।।69।।
स्यादाधारो जलादीनां गमनप्रतिबन्धत:।
अगतीनां किमाधारैर्गुणसामान्यकर्मणाम्।।70।।
एतेन समवायश्च समवायि च कारणम्।
व्यवस्थितत्वं जात्यादेर्निरस्तमनपाश्रयात्।।71।।
परतो भावनाशश्चेत् तस्य किं स्थितिहेतुना।
स विनश्येद् विनाऽप्यन्यैरशक्ता: स्थितिहेतव:।।72।।
स्थितिमान् नाश्रय: सर्व: सर्वोत्पत्तौ च साश्रय:।
तस्मात् सर्वस्य भावस्य न विनाश: कदाचन।।73।।
स्वयं विनश्वरात्मा चेत् तस्य क: स्थापक: पर।
स्वयं न नश्वरात्मा चेत् तस्य क: स्थापक: पर:।।74।।
बुद्धिव्यापारभेदेन निर्ह्रासातिशयावपि।
प्रज्ञादेर्भवतो देहनिर्ह्रासातिशयौ विना।।75।।
इदं दीपप्रभादीनामाश्रितानां न विद्यते।
स्यात् ततोऽपि विशेषोऽस्य न चित्तेऽनुपकारिणि।।76।।
रागादिवृद्धि: पुष्ट्यादे: कदाचित् सुखदु:खजा।
तयोश्च धातुसाम्यादेरन्तरर्थस्य सन्निधे:।।77।।
एतेन सन्निपातादे: स्मृतिभ्रंशादयो गता:।
विकारयति धीरेव ह्यन्तरर्थविशेषजा।।78।।

शार्दूलशोणितादीनां सन्तानातिशये क्वचित्।
मोहादय: सम्भवन्ति श्रवणेक्षणतो यथा।।79।।
तस्मात् स्वस्यैव संस्कारं नियमेनानुवर्तते।
तन्नान्तरीयकं चित्तमतश्चित्तसमाश्रितम्।।80।।
यथा श्रुतादिसंस्कार: कृतश्चेतसि चेतसि।
कालेन व्यज्यतेऽभेदात् स्याद् देहेऽपि ततो गुण:।।81।।

{पुनर्जन्मसिद्धि:}

अनन्यसत्त्वनेयस्य हीनस्थानपरिग्रह:।
आत्मस्नेहवतो दु:खसुखत्यागाप्तिवाञ्छया।।82।।
दु:खे विपर्यासमति: तृष्णा चाऽऽबन्धकारणम्।
जन्मिनो यस्य ते न स्तो न स जन्माधिगच्छति।।83।।
गत्यागती न दृष्टे चेदिन्द्रियाणामपाटवात्।
अदृष्टिर्मन्दनेत्रस्य तनुधूमागतिर्यथा।84।।
तनुत्वान्मूर्तमपि तु किञ्चित् क्वचिदशक्तिमत्।
जलवत् सूतवद्धेम्नि नादृष्टेनासदेव वा।।85।।
पाण्यादिकम्पे सर्वस्य कम्पप्राप्तेर्विरोधिन:।
एकस्मिन् कर्मणोऽयोगात् स्यात् पृथक् सिद्धिरन्यथा।।86।।
एकस्य चावृतौ सर्वस्यावृति स्यादनावृतौ।
दृश्येत रक्ते चैकस्मिन् रागोऽरक्तस्य वाऽगति:।।87।।
नास्त्येकसमुदायोऽस्मादनेकत्वेऽपि पूर्ववत्।
अविशेषादणुत्वाच्च न गतिश्चेन्न सिध्यति।।88।।
अविशेष:; विशिष्टानामैन्द्रियत्वमतोऽनणु:।
एतेनावरणादीनामभावश्च निराकृत:।।89।।
कथं वा सूतहेमादिमिश्रं तप्तोपलादि वा।
दृश्यम् ? पृथगशक्तानामक्षादीनां गति: कथम्।।90।।
संयोगाच्चेत्; समानोऽत्र प्रसङ्गो हेमसूतयो:।
दृश्य: संयोग इति चेत् कुतोऽदृश्याश्रये गति:!।।91।।
रसरूपादियोगश्च संयोग उपचारत:।
इष्टश्चेद् बुद्धिभेदोऽस्तु पंक्तिदीर्घेति वा कथम्!।।92।।
संख्यासंयोगकर्मादेरपि तद्वत् स्वरूपत:।
अभिलापाच्च भेदेन रूपं बुद्धौ न भासते।।93।।
शब्दज्ञाने विकल्पेन वस्तुभेदानुसारिणा।

गुणादिष्विव कल्प्यार्थे नष्टाजातेषु वा यथा।।94।।
मतो यद्युपचारोऽत्र स इष्टो यन्निबन्धन:।
स एव सर्वभावेषु हेतु: किं नेष्यते तयो:।।95।।
उपचारो न सर्वत्र यदि भिन्नविशेषणम्।
मुख्यमित्येव च कुतोऽभिन्ने भिन्नार्थतेति चेत् !।।96।।
अनर्थान्तरहेतुत्वेऽप्यपर्याय: सितादिषु।
संख्यादियोगिन: शब्दास्तत्राप्यर्थान्तरं यदि।।97।।
गुणद्रव्याविशेष: स्याद् भिन्नो व्यावृत्तिभेदत:।
स्यादनर्थान्तरार्थत्वेऽप्यकर्माद्रव्यशब्दवत्।।98।।
व्यतिरेकीव यच्चापि सूच्यते भाववाचिभि:।
संख्यादितद्वत: शब्दैस्तद्धर्मान्तरभेदकम्।।99।।
श्रुतिस्तन्मात्रजिज्ञासोरनाक्षिप्ताखिलापरा।
भिन्नं धर्ममिवाचष्टे योगोऽङ्गुल्या इति क्वचित्।। 100।।
युक्ताङ्गुलीति सर्वेषामाक्षेपाद् धर्मिवाचिनी।
ख्यातैकार्थाभिधानेऽपि तथा विहितसंस्थिति:।। 101।।
रूपादिशक्तिभेदानामनाक्षेपेण वर्त्तते।
तत्समानफलाऽहेतुव्यवच्छेदे घटश्रुति:।। 102।।
अतो न रूपं घट इत्येकाधिकरणा श्रुति:।
भेदोऽयमीदृशो जातिसमुदायाभिधायिनो:।। 103।।
रूपादयो घटस्येति तत्सामान्योपसर्जना:।
तच्छक्तिभेदा: ख्याप्यन्ते वाच्योऽन्योऽपि दिशानया।। 104।।
हेतुत्वे च समस्तानामेकाङ्गविकलेऽपि न।
प्रत्येकमपि सामर्थ्ये युगपद् बहुसम्भव:।। 105।।
नानेकत्वस्य तुल्यत्वात् प्राणापानौ नियामकौ।
एकत्वेऽपि बहुव्यक्तिस्तद्धेतोर्नित्यसन्निधे:।। 106।।
नानेकहेतुरिति चेन्नाविशेषात् क्रमादपि।
नैकप्राणेऽप्यनेकार्थग्रहणान्नियमस्तत:।। 107।।
एकयाऽनेकविज्ञाने बुद्ध्याऽस्तु सकृदेव तत्।
अविरोधात्; क्रमेणापि मा भूत् तदविशेषत:।। 108।।
बहव: क्षणिका: प्राणा अस्वजातीयकालिका:।
तादृशामेव चित्तानां कल्प्यते यदि कारणम्।। 109।।
क्रमवन्त: कथं ते स्यु: क्रमवद्धेतुना विना।

पूर्वस्वजातिहेतुत्वे न स्यादाद्यस्य सम्भवः।। 110।।
तद्धेतुस्तादृशो नास्ति सति वाऽनेकता ध्रुवम्।
प्राणानां भिन्नदेशत्वात् सकृज्जन्म धियामतः।। 111।।
यद्येककालिकोऽनेकोऽप्येकचैतन्यकारणम्।
एकस्यापि न वैकल्ये स्यान्मन्दश्वसितादिषु।। 112।।
अथ हेतुर्यथाभावं ज्ञानेऽपि स्याद् विशिष्टता।
न हि तत् तस्य कार्यं यद् यस्य* भेदान्न भिद्यते।। 113 ।। (पा0टि0 *-तस्य-रा0)
विज्ञानं शक्तिनियमादेकमेकस्य कारणम्।
अन्यार्थासक्तिविगुणे ज्ञाने नार्थान्तराग्रहात्।। 114।।

{कर्मसिद्धिः}

शरीरात् सकृदुत्पन्ना धीः स्वजात्या नियम्यते।
परतश्चेत् समर्थस्य देहस्य विरतिः कुतः।। 115।।
अनाश्रयान्निवृत्ते स्याच्छरीरे चेतसः स्थितिः।
केवलस्येति चेच्चित्तसन्तानस्थितिकारणम्।। 116।।
तद्धेतुवृत्तिलाभाय नाङ्गतां यदि गच्छति।
हेतुर्देहान्तरोत्पत्तौ पञ्चायतनमैहिकम्।। 117।।
तदङ्गभावहेतुत्वनिषेधेऽनुपलम्भनम्।
अनिश्चयकरं प्रोक्तं इन्द्रियाद्यपि शेषवत्।। 118।।
दृष्टा च शक्तिः पूर्वेषामिन्द्रियाणां स्वजातिषु।
विकारदर्शनात् सिद्धमपरापरजन्म च।। 119।।
शरीराद् यदि तज्जन्म प्रसङ्गः पूर्ववद् भवेत्।
चित्ताच्चेत् तत एवास्तु जन्म देहान्तरस्य च।। 120।।
तस्मान्न हेतुवैकल्यात् सर्वेषामन्त्यचेतसाम्।
असन्धिरीदृशं तेन शेषवत् साधनं मतम्।। 121।।
अभ्यासेन विशेषेऽपि लङ्घनोदकतापवत्।
स्वभावातिक्रमो मा भूदिति चेद्; आहितः स चेत्।। 122।।
पुनर्यत्नमपेक्षेत यदि स्याच्चास्थिराश्रयः।
विशेषो नैव वर्धेत स्वभावश्च न तादृशः।। 123।।
तत्रोपयुक्तशक्तीनां विशेषानुत्तरान् प्रति।
साधनानामसामर्थ्यान्नित्यं चानाश्रयस्थितेः।। 124।।
विशेषस्यास्वभावत्वाद् वृद्धावप्याहितो* यदा।
नापेक्षेत पुनर्यत्नं यत्नोऽन्यः स्याद् विशेषकृत्।। 125।। (पा0टि0- *वप्याहिता-रा0)

काष्ठपारदहेमादेरग्न्यादेरिव चेतसः।
अभ्यासजाः प्रवर्त्तन्ते स्वरसेन कृपादयः।। 126।।
तस्मात् स तेषामुत्पन्नः स्वभावो जायते गुणः।
तदुत्तरोत्तरो यत्नो विशेषस्य विधायकः।।127।।
यस्माच्च तुल्यजातीयपूर्वबीजप्रवृद्धयः।
कृपादिबुद्धयस्तासां सत्यभ्यासे कुतः स्थितिः ! ।।128।।
न चैवं लङ्घनादेव लङ्घनं बलयत्नयोः।
तद्वेत्वोः स्थितशक्तित्वाल्लङ्घनस्य स्थितात्मता।।129।।
तस्यादौ देहवैगुण्यात् पश्चाद्वदविलङ्घनम्।
शनैर्यत्नेन वैगुण्ये निरस्ते स्वबले स्थितिः।।130।।
कृपा स्वबीजप्रभवा स्वबीजप्रभवैर्न चेत्।
विपक्षैर्बाध्यते चित्ते प्रयात्यत्यन्तसात्मताम्।।131।।
तथा हि मूलमभ्यासः पूर्वः पूर्वः परस्य तु।
कृपावैराग्यबोधादेश्चित्तधर्मस्य पाटवे।।132।।
कृपात्मकत्वमभ्यासाद् घृणावैराग्यरागवत्।
निष्पन्नः* करुणोत्कर्षः परदुःखाक्षमेरितः*।।133।।
(पा0टि0- *निष्पन्नकरुणोत्कर्षपरदुःखक्षमेरितः-रा0।)

{4- शास्तृत्वाच्च भगवान् प्रमाणम्}

{शास्तृत्वपदनिर्वचनम्}

दयावान् दुःखहानार्थमुपायेष्वभियुज्यते।
परोक्षोपेयद्वेतोस्तदाख्यानं हि दुष्करम्।।134।।

{दुःखहेतुपरीक्षा}

युक्त्यागमाभ्यां विमृशन् दुःखहेतुं परीक्षते।
तस्यानित्यादिरूपं च दुःखस्यैव विशेषणैः।।135।।
यतस्तथा स्थिते हेतौ निवृत्तिर्नेति पश्यति।
फलस्य हेतोर्हानार्थं तद्विपक्षं परीक्षते।।136।।
साध्यते तद्विपक्षोऽपि हेतो रूपावबोधतः।
आत्मात्मीयग्रहकृतः स्नेहः संस्कारगोचरः।।137।।
हेतुर्विरोधि नैरात्म्यदर्शनं तस्य बाधकम्।
बहुशो बहुधोपायं कालेन बहुनास्य च।।138।।
गच्छन्त्यभ्यस्यतस्तत्र गुणदोषाः प्रकाशताम्।
बुद्धेश्च पाटवाद्धेतोर्वासनातः प्रहीयते।।139।।

{प्रत्येकबुद्धादिभ्यो बुद्धस्य वैशिष्ट्यम्}

परार्थवृत्ते: खड्गादेर्विशेषोऽयं महामुने:।

उपायाभ्यास एवायं तादर्थ्याच्छासनं मतम्।।140।।

निष्पत्ते: प्रथमं भावाद्धेतुरुक्तमिदं द्वयम्।

{5- सुगतत्वाद् भगवान् प्रमाणम्}

{त्रिगुणं सुगतत्वम्}

हेतो: प्रहाणं त्रिगुणं सुगतत्वमनि:श्रयात्।।141।।

दु:खस्य शस्तं नैरात्म्यदृटेश्च* युक्तितोऽपि* वा।

पुनरावृत्तिरित्युक्तौ जन्मदोषसमुद्भवौ।।142।। (पा0टि0-*दृष्टेस्तद्यक्ति0-पाठा0)

आत्मदर्शनबीजस्य हानादपुनरागम:।

तद्भूतभिन्नात्मतया शेषमक्लेशनिर्ज्वरम्।।143।।

कायवाग्बुद्धिवैगुण्यं मार्गोक्त्यपटुतापि वा।

अशेषहानमभ्यासाद्;

{सर्वज्ञबाधने जैमिनीयमतम्}

उक्त्यादेर्दोषसंक्षय:।।144।।

नेत्येके;

{तत्प्रतिवचनम्}

व्यतिरेकोऽस्य सन्दिग्धो व्यभिचार्यत:।

अक्षयित्वं च दोषाणां नित्यत्वादनुपायत:।।145।।

उपायस्यापरिज्ञानादपि* वा परिकल्पयेत्।

हेतुमत्त्वाद् विरुद्धस्य हेतोरभ्यासत: क्षयात्।।146।।(पा0टि0-* परिज्ञानादिति-पाठा0)

हेतुस्वभावज्ञानेन तज्ज्ञानमपि साध्यते।

{6- तायित्वाद् भगवान् प्रमाणम्}

ताय: स्वदृष्टमार्गोक्ति:, वैफल्याद् वक्ति नानृतम्।।147।।

दयालुत्वात् परार्थञ्च सर्वारम्भाभियोगत:।

तस्मात्* प्रमाणम्; तायो वा चतु:सत्यप्रकाशनम्।।148।।(पा0टि0-* तत:-पाठा0)

{चतुरार्यसत्यनिरूपणम्}

{1- दु:खसत्यम्}

दु:खं संसारिण: स्कन्धा:; रागादे: पाटवेक्षणात्।

अभ्यासान्न यदृच्छातोऽहेतोर्जन्मविरोधत:।।149।।

व्यभिचारान्न वातादिधर्म: प्रकृतिसङ्करात्।

अदोषश्च तदन्योऽपि धर्म: किं तस्य नेक्ष्यते।।150।।

न सर्वधर्म: सर्वेषां समरागप्रसङ्गत:।
रूपादिवददोषश्चेत् तुल्यं तत्रापि चोदनम्।।151।।
आधिपत्यं विशिष्टानां यदि तत्र न कर्मणाम्।
विशेषेऽपि च दोषाणामविशेषाद्; असिद्धता।।152।।
न विकाराद् विकारेण सर्वेषाम्, न च सर्वजा:।
कारणे वर्धमाने च कार्यहानिर्न युज्यते।।153।।
तापादिष्विव; रागादेर्विकारोऽपि सुखादिज:।
वैषम्यजेन दु:खेन रागस्यानुद्भवो यदि।।154।।
वाच्यं केनोद्भव: साम्यान्मदवृद्धि: स्मरस्तत:।
रागी विषमदोषोऽपि दृष्ट: साम्येऽपि नापर:।।155।।
क्षयादसृक्स्रुतोऽप्यन्ये; नैकस्त्रीनियतो मद:।
तेनैकस्यां न तीव्र: स्याद्, अङ्गं रूपाद्यपीति चेत्।।156।।
न सर्वेषामनेकान्तान्न चाप्यनियतो भवेत्।
अगुणग्राहिणोऽपि स्यात्; अङ्गं सोऽपि गुणग्रह:।।157।।
यदि सर्वो गुणग्राही स्याद्, हेतोरविशेषत:।
यदवस्थो मतो रागी न द्वेषी स्याच्च तादृश:।।158।।
तयोरसमरूपत्वान्नियमश्चात्र नेक्ष्यते।
सजातिवासनाभेदप्रतिबद्धप्रवृत्तय:।।159।।
यस्य रागादयस्तस्य नैते दोषा: प्रसङ्गिन:।
एतेन भूतधर्मत्वं निषिद्धम्; नि:श्रयस्य च।।160।।
निषेधान्न पृथिव्यादिनि:श्रिता धवलादय:।
तदुपादाय शब्दश्च हेत्वर्थ: स्वाश्रयेण च।।161।।
अविनिर्भागवर्तित्वाद् रूपादेराश्रयोऽपि वा।
मदादिशक्तेरिव चेद् विनिर्भाग:; न वस्तुन:।।162।।
शक्तिरर्थान्तरं वस्तु नश्येन्नाश्रितमाश्रये।
तिष्ठत्यविकले याति, तत्तुल्यं चेन्न भेदत:।।163।।
भूतचेतनयो:; भिन्नप्रतिभासावबोधत:।
आविकारञ्च कायस्य तुल्यरूपं भवेन्मन:।।164।।
रूपादिवत्; विकल्पस्य कैवार्थपरतन्त्रता।
अनपेक्ष्य यदा कायं वासनाबोधकारणम्।।165।।
ज्ञानं स्यात् कस्यचित् किञ्चित् कुतश्चित् तेन किञ्चन।
अविज्ञानस्य विज्ञानानुपादानाच्च सिध्यति।।166।।

विज्ञानशक्तिसम्बन्धादिष्टं चेत् सर्ववस्तुन:।
एतत् सांख्यपशो: कोऽन्य: सलज्जो वक्तुमीहते।।167।।
अदृष्टपूर्वमस्तीति तृणाग्रे करिणां शतम्।
यद् रूपं दृश्यतां यातं तद् रूपं प्राङ् न दृश्यते।।168।।
शतधा विप्रकीर्णेऽपि हेतौ तद् विद्यते कथम्।
रागाद्यनियमोऽपूर्वप्रादुर्भावे प्रसज्यते।।169।।
भूतात्मताऽनतिक्रान्त: सर्वो रागादिमान् यदि।
सर्व: समानराग: स्याद् भूतातिशयतो न चेत्।।170।।
भूतानां प्राणिताऽभेदेऽप्ययं भेदो यदाश्रय:।
तन्निर्ह्रासातिशयवत् तद्भावात् तानि हापयेत्।।171।।
न चेद् भेदेऽपि रागादिहेतुतुल्यात्मताक्षय:।
सर्वत्र राग: सदृश: स्याद्धेतोस्सदृशात्मन:।।172।।
न हि गोप्रत्ययस्यास्ति समानात्मभुव: क्वचित्।
तारतम्यं पृथिव्यादौ प्राणितादेरिहापि वा।।173।।
औष्ण्यस्य तारतम्येऽपि नानुष्णोऽग्नि: कदाचन।
तथेहापीति चेन्नाग्नेरौष्ण्याद् भेदनिषेधत:।।174।।
तारतम्यानुभविनो यस्यान्यस्य सतो गुणा:।
ते क्वचित् प्रतिहन्यन्ते तद्भेदे धवलादिवत्।।175।।
रूपादिवन्न नियमस्तेषां भूताविभागत:।
तत् तुल्यं चेन्न रागादे: सहोत्पत्तिप्रसङ्गत:।।176।।
विकल्प्यविषयत्वाच्च विषया न नियामका:।
सभागहेतुविरहाद् रागादेर्नियमो न वा।।177।।
सर्वदा सर्वबुद्धीनां जन्म वा हेतुसन्निधे:।

{दु:खसत्यस्य चतुराकारत्वम्}

कदाचिदुपलम्भात् तदध्रुवं दोषनि:श्रयात्।।178।।
दु:खं हेतुवशत्वाच्च न चात्मा नाप्यधिष्ठितम्।
नाकारणमधिष्ठाता नित्यं वा कारणं* कथम्।।179।। (पा0टि0-*जनकं-पाठा0)
तस्मादनेकमेकस्माद् भिन्नकालं न जायते।
कार्यानुत्पादतोऽन्येषु सङ्गतेष्वपि हेतुषु।।180।।
हेत्वन्तरानुमानं स्यान्नैतन् नित्येषु विद्यते।

{2- चतुराकारं समुदयसत्यम्}

कादाचित्कतया सिद्धा दु:खस्यास्य सहेतुता।।181।।

नित्यं सत्त्वमसत्त्वं वा हेतोर्बाह्यनपेक्षणात्*।(पा0टि0-*हेतोरन्यानपे0-पाठा0)

{स्वभाववादखण्डनम्}

'तैक्ष्ण्यादीनां यथा नास्ति कारणं कण्टकादिषु।।182।।
तथाऽकारणमेतत् स्याद्' इति केचित् प्रचक्षते।
सत्येव यस्मिन् यज्जन्म विकारे वापि विक्रिया।।183।।
तत् तस्य कारणं प्राहुस्तत् तेषामपि विद्यते।
स्पर्शस्य रूपहेतुत्वाद् दर्शनेऽस्ति निमित्तता।184।।
नित्यानां प्रतिषेधेन नेश्वरादेश्च सम्भवः।
असामर्थ्यादतो हेतुर्भववाञ्छा; परिग्रहः।।185।।
यस्माद् देशविशेषस्य तत्प्राप्त्याशाकृतो नृणाम्।
सा भवेच्छाप्त्यनाप्तीच्छोः प्रवृत्तिः सुखदुःखयोः।।186।।
यतोऽपि प्राणिनः कामविभवेच्छे च ते मते।
सर्वत्र चात्मस्नेहस्य हेतुत्वात् सम्प्रवर्तते।।187।।
असुखे सुखसंज्ञस्य; तस्मात् तृष्णा भवाश्रयः।
विरक्तजन्मादृष्टेरित्याचार्याः सम्प्रचक्षते।।188।।
अदेहरागादृष्टेश्च देहाद् रागसमुद्भवः।
निमित्तोपगमादिष्टमुपादानं तु वार्यते।।189।।
इमां तु युक्तिमन्विच्छन् बाधते स्वमतं स्वयम्।
जन्मना सहभावश्चेत् जातानां रागदर्शनात्।।190।।
सभागजातेः प्राक् सिद्धिः; कारणत्वेऽपि नोदितम्।
अज्ञानम्, उक्ता तृष्णैव सन्तानप्रेरणाद् भवे।।191।
आनन्तर्याच्च कर्मापि सति तस्मिन्नसम्भवात्।
तदनात्यन्तिकं हेतोः प्रतिबन्धादिसम्भवात्।।192।।

{चतुराकारं निरोधसत्यम्}

संसारित्वादनिर्मोक्षो नेष्टत्वादप्रसिद्धितः।
यावच्चात्मनि* न प्रेम्णो हानिः स परितस्यति।।193।।(पा0टि0-*यावदात्मवि-पाठा0)
तावद् दुःखितमारोप्य न च स्वस्थोऽवतिष्ठते।
मिथ्याध्यारोपहानार्थं यत्नोऽसत्यपि मोक्तरि।।194।।
अवस्था वीतरागाणं दयया कर्मणाऽपि वा।
आक्षिप्तेऽविनिवृत्तीष्टेः; सहकारिक्षयादलम्।।195।।
नाक्षेप्तुमपरं कर्म भवतृष्णाविलङ्घिनाम्।
दुःखज्ञानेऽविरुद्धस्य पूर्वसंस्कारवाहिनी।।196।।

वस्तुधर्मो दयोत्पत्तिर्न सा सत्त्वानुरोधिनी।
आत्मान्तरसमारोपाद् रागो धर्मेऽतदात्मके।।197।।
दु:खसन्तानसंस्पर्शमात्रेणैवं दयोदय:।
मोहश्च मूलं दोषाणां स च सत्त्वग्रह:; विना।।198।।
तेनाद्यहेतौ न द्वेषो, न दोषोऽत: कृपा मता।
नामुक्ति: पूर्वसंस्कारक्षयेऽन्याप्रतिसन्धित:।।199।।
अक्षीणशक्ति: संस्कारो येषां तिष्ठन्ति तेऽनघा:।
मन्दत्वात् करुणायाश्च न यत्न: स्थापने महान्।।200।।
तिष्ठन्त्येव पराधीना येषां तु महती कृपा।
सत्कायदृष्टेर्विगमादाद्य एवाभवो भवेत्।।201।।
मार्गे चेत् सहजाहानेर्न हानौ वा भव: कुत:।
सुखी भवेयं दु:खी वा मा भूवमिति तृष्यत:।।202।।
यैवाऽहमिति धी: सैव सहजं सत्त्वदर्शनम्।
न हृयपश्यन्नहमिति कश्चिदात्मनि स्निहृयति।।203।।
न चात्मनि विना प्रेम्णा सुखकामोऽभिधावति।
दु:खस्योत्पादहेतुत्वं बन्ध:, नित्यस्य तत् कुत:!।।204।।
अदु:खोत्पादहेतुत्वं मोक्ष:, नित्यस्य तत् कुत:।
अनित्यत्वेन योऽवाच्य: स हेतुर्न हि कस्यचित्।।205।।
बन्धमोक्षावप्यवाच्ये न युज्येते कथञ्चन।
नित्यं तमाहुर्विद्वांसो य: स्वभावो न नश्यति।।206।।
त्यक्त्वेमां ह्रेपणीं दृष्टिमतोऽनित्य: स उच्यताम्।

{चतुराकारं मार्गसत्यम्}

उक्तो मार्ग:, तदभ्यासादाश्रय: परिवर्त्तते।।207।।
सात्म्येऽपि दोषभावश्चेन्मार्गवत्, नाविभुत्वत:।
विषयग्रहणं धर्मो विज्ञानस्य यथास्ति स:।।208।।
गृहृयते सोऽस्य जनको विद्यमानात्मनेति च।
एषा प्रकृतिरस्यास्तन्निमित्तान्तरत: स्खलत्।।209।।
व्यावृत्तौ प्रत्ययापेक्षमदृढं सर्पबुद्धिवत्।
प्रभास्वरमिदं चित्तं प्रकृत्यागन्तवो मला:।।210।।
तत्प्रागप्यसमर्थानां पश्चाच्छक्ति: क्व तन्मये।
नालं प्ररोढुमत्यन्तं स्यन्दिन्यामग्निवद् भुवि।।211।।
बाधकोत्पत्तिसामर्थ्यगर्भे शक्तोऽपि वस्तुनि।

निरुपद्रवभूतार्थस्वभावस्य विपर्ययै:।।212।।
न बाधा यत्नवत्त वेऽपि बुद्धेस्तत्पक्षपातत:।
आत्मग्रहैकयोनित्वात्, कार्यकारणभावत:।।213।।
रागप्रतिघयोर्बाधा भेदेऽपि न परस्परम्।
मोहाविरोधान्मैत्र्यादेर्नात्यन्तं दोषनिग्रह:।।214।।
तन्मूलाश्च मला: सर्वे; स च सत्कायदर्शनम्।
विद्याया: प्रतिपक्षत्वाच्चैत्तत्वेनोपलब्धित।।215।।
मिथ्योपलब्धिरज्ञानं युक्तेश्चान्यदयुक्तिमत्।
व्याख्येयोऽत्र विरोधो य:; तद्विरोधाच्च तन्मयै:।।216।।
विरोध: शून्यतादृष्टे: सर्वदोषै: प्रसिध्यति।
नाक्षय: प्राणिधर्मत्वाद् रूपादिवदसिद्धित:।।217।।
सम्बन्धे प्रतिपक्षस्य त्यागस्यादर्शनादपि*।
न काठिन्यवदुत्पत्ति: पुनर्दोषविरोधिन:।।218।। (पा0टि0- *त्यागसंसर्जनादपि-पाठा0)
सात्मत्वेनानपायत्वात् अनेकान्ताञ्च भस्मवत्।
य: पश्यत्यात्मानं तत्रास्याहमिति शाश्वत: स्नेह:।।219।।
स्नेहात् सुखेषु तृष्यति, तृष्णा दोषांस्तिरस्कुरुते*।
गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते।।220।।(पा0टि0-*दोषास्थिरीकुरुते-पाठा0)
तेनात्माभिनिवेशो यावत् तावत् स संसारे।
आत्मनि सति परसंज्ञा, स्वपरविभागात् परिग्रहद्वेषौ।।221।।
अनयो: सम्प्रतिबद्धा: सर्वे दोषा: प्रजायन्ते।
नियमेनात्मनि स्निहयंस्तदीये न विरज्यते।।222।।
न चास्त्यात्मनि निर्दोषे स्नेहापगमकारणम्।
स्नेह: सदोष इति चेत् तत: किं तस्य वर्जनम्।।223।।
अदूषितेऽस्य विषये न शक्यं तस्य वर्जनम्।
प्रहाणिरिच्छाद्वेषादेर्गुणदोषानुबन्धिन:।।224।।
तयोरदृष्टिर्विषये; न तु बाहयेषु य: क्रम:।
न हि स्नेहगुणात् स्नेह: किन्त्वर्थगुणदर्शनात्।।225।।
कारणेऽविकले तस्मिन् कार्यं केन निवार्यते।
का वा सदोषता दृष्टा स्नेहे दु:खसमाश्रय:।।226।।
तथापि न विरागोऽत्र स्वत्वदृष्टेर्यथात्मनि।
न तैर्विना दु:खहेतुरात्मा चेत् तेऽपि तादृशा:।।227।।
निर्दोषं द्वयमप्येवं वैराग्यान्न द्वयोस्तत:।

दु:खभावनया स्याच्चेदहिदष्टाङ्गहानिवत्।।228।।
आत्मीयबुद्धिहान्याऽत्र त्यागो न तु विपर्यये।
उपभोगाश्रयत्वेन गृहीतेष्विन्द्रियादिषु।।229।।
स्वत्वधी: केन वार्येत वैराग्यं तत्र तत् कुत:।
प्रत्यक्षमेव सर्वस्य केशादिषु कलेवरात्।।230।।
च्युतेषु सघृणा बुद्धिर्जायतेऽन्येषु सस्पृहा।
समवायादिसम्बन्धजनिता तत्र हि स्वधी:।।231।
स तथैवेति सा दोषदृष्टावपि न हीयते।
समवायाद्यभावेऽपि सर्वत्रास्त्युपकारिता।।232।।
दु:खोपकारान्न भवेदंगुल्यामिव चेत् स्वधी:।
न हृयेकान्तेन तद् दु:खं भूयसा सविषान्नवत्।।233।।
विशिष्टसुखसङ्गात् स्यात् तद्विरुद्धे विरागिता।
किञ्चित् परित्यजेत् सौख्यं विशिष्टसुखतृष्णया।।234।।
नैरात्म्ये तु यथालाभमात्मस्नेहात् प्रवर्तते।
अलाभे मत्तकासिन्या दृष्टा तिर्यक्षु कामिता।।235।।
यस्यात्मा वल्लभस्तस्य स नाशं कथमिच्छति !
निवृत्तसर्वानुभवव्यवहारगुणाश्रयम्।।236।।
इच्छेत् प्रेम कथम्; प्रेम्ण: प्रकृतिर्न हि तादृशी।
सर्वथात्मग्रह: स्नेहमात्मनि द्रढयत्यलम्।।237।।
आत्मीयस्नेहबीजं तु तदवस्थं व्यवस्थितम्।
यत्नेऽप्यात्मीयवैराग्यं गुणलेशसमाश्रयात्।।238।।
वृत्तिमान् प्रतिबध्नाति, तद्दोषान् संवृणोति च।
आत्मन्यपि विरागश्चेदिदानीं यो विरज्यते।।239।।
त्यजत्यसौ यथात्मानं व्यर्थाऽतो दु:खभावना।
दु:खभावनयाऽप्येष दु:खमेव विभावयेत्।।240।।
प्रत्यक्षं पूर्वमपि तत् तथापि न विरागवान्।
यद्यप्येकत्र दोषेण तत्क्षणं चलिता मति:।।241।।
विरक्तो नैव तत्रापि कामीव वनितान्तरे।
त्याज्योपादेयभेदे हि सक्तिर्यैवैकभाविनी।।242।।
सा बीजं सर्वसक्तीनां पर्यायेण समुद्भवे।
निर्दोषविषय: स्नेहो निर्दोष: साधनानि च।।243।।
एतावदेव च जगत् क्वेदानीं स विरज्यते।

सदोषताऽपि चेत् तस्य, तत्रात्मन्यपि सा समा।।244।।
तत्राविरक्तस्तद्दोषे क्वेदानीं स विरज्यते।
गुणदर्शनसम्भूतं स्नेहं बाधितदोषदृक्।।245।।
स चेन्द्रियादौ न त्वेवं बालादेरपि सम्भवात्।
दोषवत्यपि सद्भावात् स्वभावाद् गुणवत्यपि।।246।।
अन्यत्रात्मीयतायां वा व्यतीतादौ विहानित:।
तत एव च नात्मीयबुद्धेरपि गुणेक्षणम्।।247।।
कारणम्; हीयते सापि तस्मान्नागुणदर्शनात्।
अपि चासद्गुणारोप: स्नेहात् तत्र हि दृश्यते।।248।।
तस्मात् तत्कारणाबाधी विविधस्तं बाधते कथम्।
परापरप्रार्थनातो विनाशोत्पादबुद्धित:।।249।।
इन्द्रियादौ पृथग्भूतमात्मानं वेत्त यय जन:।
तस्मान्नैकत्वदृष्ट्यापि स्नेह: स्निहयन् स आत्मनि।।250।।
उपलम्भान्तरङ्गेषु प्रकृत्यैवानुरज्यते।
प्रत्युत्पन्नात् तु यो दु:खान्निर्वेदो द्वेष ईदृश:।।251।।
न वैराग्यम्; तदाप्यस्य स्नेहोऽवस्थान्तरेषणात्।
द्वेषस्य दु:खयोनित्वात् स तावन्मात्रसंस्थिति:।।252।।
तस्मिन् निवृत्ते प्रकृतिं स्वामेव भजते पुन:।
औदासीन्यं तु सर्वत्र त्यागोपादानहानित:।।253।।
वासीचन्दनकल्पानां वैराग्यं नाम कथ्यते।
संस्कारदु:खतां मत्वा कथिता दु:खभावना।254।।
सा च न: प्रत्ययोत्पत्ति: सा नैरात्म्यदृगाश्रय:।
मुक्तिस्तु शून्यतादृष्टेस्तदर्था: शेषभावना:।।255।।
अनित्यात् प्राह तेनैव दु:खं दु:खान्निरात्मताम्।
अविरक्तश्च तृष्णावान् सर्वारम्भसमाश्रित:।।256।।
सोऽमुक्त: क्लेशकर्मभ्यां संसारी नाम तादृश:।
आत्मीयमेव यो नेच्छेद् भोक्ताप्यस्य न विद्यते।।257।।
आत्मापि न तदा तस्य क्रियाभोगौ हि लक्षणम्।
तस्मादनादिसन्तानतुल्यजातीयबीजिकाम्।।258।।
उत्खातमूलां कुरुत सत्त वदृष्टिं मुमुक्षव:।
आगमस्य तथाभावनिबन्धनमपश्यताम्।।259।।
मुक्तिमागममात्रेण वदन्न परितोषकृद्।

{मोक्षे दीक्षाविधिरकिञ्चित्कर:}

नालं बीजादिसंसिद्धो विधि: पुंसामजन्मने।।260।।
तैलाभ्यङ्गाग्निदाहादेरपि मुक्तिप्रसङ्गत:।
प्राग् गुरोर्लाघवात् पश्चान्न पापहरणं कृतम्।।261।।
मा भूद् गौरवमेवास्य न पापं गुर्वमूर्त्तित:।
मिथ्याज्ञानतदुद्भूततर्षसञ्चेतनावशात्।।262।।
हीनस्थानगतिर्जन्म ततस्तच्छिन्न जायते।
तयोरेव हि सामर्थ्यं जातौ तन्मात्रभावत:।।263।।
ते चेतने स्वयं कर्मेत्यखण्डं जन्मकारणम्।
'गतिप्रतीत्यो: करणान्याश्रयास्तान्यदृष्टत:।।264।।
अदृष्टनाशादगति: तत्संस्कारो न चेतना' ?
सामर्थ्यं करणोत्पत्तेर्भावाभावानुवृत्तित:।।265।।
दृष्टं बुद्धेर्न चान्यस्य सन्ति तानि नयन्ति किम्।
धारणप्रेरणक्षोभनिरोधाश्चेतनावशा:।।266।।
न स्युस्तेषामसामर्थ्ये तस्य दीक्षाद्यनन्तरम्।
अथ बुद्धेस्तदाभावान्न स्यु: सन्धीयते मलै:।।267।।
बुद्धेस्तेषामसामर्थ्ये जीवतोऽपि स्युरक्षमा:।
निर्ह्रासातिशयात् पुष्टौ प्रतिपक्षस्वपक्षयो:।।268।।
दोषा: स्वबीजसन्ताना दीक्षितेऽप्यनिवारिता:।
नित्यस्य निरपेक्षत्वात् क्रमोत्पत्तिर्विरुध्यते।।269।।
क्रियायामक्रियायाञ्च क्रिययो: सदृशात्मन:।
ऐक्यञ्च हेतुफलयोर्व्यतिरेकस्ततस्तयो:।।270।।
कर्तृभोक्तृत्वहानि: स्यात् सामर्थ्यं च न सिध्यति।
अन्यस्मरणभोगादिप्रसङ्गाश्च न बाधका:।।271।।
अस्मृते:; कस्यचित् तेन ह्यनुभूते: स्मृतोद्भव:।
स्थिरं सुखं ममाहं चेत्यादिसत्यचतुष्टये।।272।।
अभूतान् षोडशाकारान् आरोप्य परितृष्यति।

{नैरात्म्यदृष्टिस्तृष्णाक्षये हेतु:}

तत्रैव तद्विरुद्धार्थतत्त्वाकारानुरोधिनी।।273।।
हन्ति सानुचरां तृष्णां सम्यग्दृष्टि: सुभाविता।
त्रिहेतोर्नोद्भव: कर्मदेहयो: स्थितयोरपि।।274।।
एकाभावाद् विना बीजं नांकुरस्येव सम्भव:।

असम्भवाद् विपक्षस्य न हानि: कर्मदेहयो:।।275।।
अशक्यत्वाच्च तृष्णायां स्थितायां पुनरुद्भवात्।
द्वयक्षयार्थं यत्ने च व्यर्थ: कर्मक्षये श्रम:।।276।।
फलवैचित्र्यदृष्टेश्च शक्तिभेदोऽनुमीयते।
कर्मणां तापसंक्लेशात् नैकरूपात् तत: क्षय:।।277।।
फलं कथञ्चित् तज्जन्यमल्पं स्यान्न विजातिमत्।
अथापि तपस: शक्त्या शक्तिसङ्करसंक्षयै:।।278।।
क्लेशात् कुतश्चिद्धीयेताशेषमक्लेशलेशत:।
यदीष्टमपरं क्लेशात् तत् तप: क्लेश एव चेत्।।279।।
तत् कर्मफलमित्यस्मान्न शक्ते: सङ्करादिकम्।
उत्पित्सुदोषनिर्घाताद् येऽपि दोषविरोधिन:।।280।।
तज्जे कर्मणि शक्ता: स्यु: कृतिहानि: कथं भवेत्।
दोषा न कर्मणो दुष्ट: करोति न विपर्ययात्।।281।।
मिथ्याविकल्पेन विना नाभिलाष: सुखादपि।
तायात् तत्त्वस्थिराशेषज्ञानसाधनम्।।282।।
बोधार्थत्वाद् गमे:; बाह्यशैक्षाशैक्षाधिकस्तत:।
परार्थज्ञानघटनं तस्मात् तच्छासनं तत:।।283।।
दयापरार्थतन्त्रत्वम्; सिद्धार्थस्याविरामत:।
दयया श्रेय आचष्टे; ज्ञानात् सत्यं ससाधनम्।।284।।
तच्चाभियोगवान् वक्तुं यतस्तस्मात् प्रमाणता।
{7- संवादकत्वाद् भगवान् प्रमाणम्}
उपदेशतथाभावस्तुतिस्तदुपदेशत:।।285।।
प्रमाणतत्त्वसिद्ध्यर्थम्; अनुमानेऽप्यवारणात्।
प्रयोगदर्शनाद् वाऽस्य; 'यत् किञ्चिदुदयात्मकम्।।286।।
निरोधधर्मकं सर्वं तद्' इत्यादावनेकधा।
अनुमानाश्रयो लिङ्गमविनाभावलक्षणम्।।
व्याप्तिप्रदर्शनाद्धेतो: साध्येनोक्तञ्च तत् स्फुटम्।।287।

प्रत्यक्षनामा

द्वितीय: परिच्छेद:

{प्रमाणस्य द्वैविध्यप्रदर्शनपूर्वकं}

तत्र संख्याविप्रतिपत्तिनिराकरणम्

मानं द्विविधं विषयद्वैविध्यात्; शक्त्यक्तित:।
अर्थक्रियायाम्; केशादिर्नार्थोऽनर्थाधिमोक्षत:।।1।।
सदृशासदृशत्वाच्च विषयाविषयत्वत:।
शब्दस्यान्यनिमित्तानां भावे धीसदसत्त्वत:*।।2।। (पा0टि0- *धी:0सदसत्त्वत:-रा0)

{सत्यद्वयविचार:}

अर्थक्रियासमर्थं यत् तदत्र परमार्थसत्।
अन्यत् संवृतिसत् प्रोक्तम्; ते स्वसामान्यलक्षणे।।3।।

{सामान्यतत्कल्पनानिरास:}

अशक्तं सर्वमिति चेद् बीजादेरङ्कुरादिषु।
दृष्टा शक्ति:; मता सा चेत् संवृत्याऽस्तु यथा तथा।।4।।

{सामान्यविचार:}

सास्ति सर्वत्र चेद् बुद्धेर्नान्वयव्यतिरेकयो:।
सामान्यलक्षणेऽदृष्टे: चक्षूरूपादिबुद्धिवत्।।5।।
एतेन समयाभोगाद्यन्तरङ्गानुरोधत:।
घटोत्क्षेपणसामान्यसंख्यादिषु धियो गता:।।6।।
केशादयो न सामान्यमनर्थाभिनिवेशत:।
ज्ञेयत्वेन ग्रहाद् दोषो नाभावेषु प्रसज्यते।।7।।
तेषामपि तथाभावेऽप्रतिषेधात्; स्फुटाभता।
ज्ञानरूपतयार्थत्वात्; केशादीति मति: पुन:।।8।।
सामान्यविषया; केशप्रतिभासमनर्थकम्।
ज्ञानरूपतयार्थत्वे सामान्ये चेत् प्रसज्यते ?।।9।।
तथेष्टत्वाददोष:; अर्थरूपत्वेन समानता।
सर्वत्र समरूपत्वात् तद्व्यावृत्तिसमाश्रयात्।।10।।
न तद् वस्त्वभिधेयत्वात् साफल्यादक्षसंहते:।
नामादिवचने वक्तृश्रोतृवाच्यानुबन्धिनि।।11।।
असम्बन्धिनि नामादावर्थे स्यादप्रवर्त्तनम्।
सारूप्याद् भ्रान्तितो वृत्तिरर्थे चेत् स्यान्न सर्वदा।।12।।

देशभ्रान्तिश्च, न ज्ञाने तुल्यमुत्पत्तितो धिय:।
तथाविधाया:; अन्यत्र तत्रानुपगमाद् धिय:।।13।।
बाह्यार्थप्रतिभासाया उपाये वाऽप्रमाणता।
विज्ञानव्यतिरिक्तस्य; व्यतिरेकाप्रसिद्धित:।।14।।
सर्वज्ञानार्थवत्त्वाच्चेत् स्वप्नादावन्यथेक्षणात्।
अयुक्तम्, न च संस्कारान्नीलादिप्रतिभासत:।।15।।
नीलाद्यप्रतिघातान्न; ज्ञानं तद् योग्यदेशकै:।
अज्ञातस्य स्वयं ज्ञानात्, नामाद्येतेन वर्णितम्।।16।।
सैवेष्टार्थवती केन चक्षुरादिमति: स्मृता।
अर्थसामर्थ्यदृष्टेश्चेदन्यत् प्राप्तमनर्थकम्।।17।।
अप्रवृत्तिरसम्बन्धेऽप्यर्थसम्बन्धवद् यदि।
अतीतानागतं वाच्यं न स्यादर्थेन तत्क्षयात्।।18।।
सामान्यग्रहणाच्छब्दादप्रसङ्गो मतो यदि।
तन्न केवलसामान्याग्रहणाद् ग्रहणेऽपि वा।।19।।
अतत्समानताव्यक्ती तेन नित्योपलम्भनम्।
नित्यत्वाच्च यदि व्यक्तिर्व्यक्ते: प्रत्यक्षतां प्रति।।20।।
आत्मनि ज्ञानजनने यच्छक्तं शक्तमेव तत्।
अथाशक्तं कदाचिच्चेदशक्तं सर्वदैव तत्।।21।।
तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता।
नित्यत्वादपि किं तस्य कस्तां क्षपयितुं क्षम: !।।22।।
तच्च सामान्यविज्ञानमनुरुन्धन् विभाव्यते।
नीलाद्याकारलेशो य: स तस्मिन् केन निर्मित:।।23।।
प्रत्यक्षप्रत्ययार्थत्वान्नाक्षाणां व्यर्थतेति चेत्।
सैवैकरूपाच्छब्दादेर्भिन्नाभासा मति: कुत:।।24।।
न जातिर्जातिमद् व्यक्तिरूपं येनापराश्रयम्।
सिद्धम्; पृथक् चेत् कार्यत्वं हयपेक्षेत्यभिधीयते।।25।।
निष्पत्तेरपराधीनमपि कार्यं स्वहेतुत:।
सम्बध्यते कल्पनया किमकार्यं कथञ्चन।।26।।
अन्यत्वे तदसम्बद्धं सिद्धाऽतो नि:स्वभावता।
जातिप्रसङ्गोऽभावस्य न; अपेक्षाभावतस्तयो:।।27।।
तस्मादरूपा रूपाणां नाश्रयेणोपकल्पिता।
तद्विशेषावगाहार्थैर्जाति: शब्दै: प्रकाश्यते।।28।।

तस्यां रूपावभासोऽयं तत्त्वेनार्थस्य वा ग्रह:।
भ्रान्ति: सा; अनादिकालीनदर्शनाभ्यासनिर्मिता।।29।।
अर्थानां यच्च सामान्यमन्यव्यावृत्तिलक्षणम्।
यन्निष्ठास्त इमे शब्दा न रूपं तस्य किञ्चन।।30।।
सामान्यबुद्धौ सामान्येनारूपायामवीक्षणात्।
अर्थभ्रान्तिरपीष्येत सामान्यं सापि; अभिप्लवात्।।31।।
अर्थरूपतया तत्त्वेनाभावाच्च न रूपिणी।
नि:स्वभावतयाऽवाच्यं कुतश्चिद् वचनान्मतम्।।32।।
यदि वस्तुनि वस्तूनामवाच्यत्वं कथञ्चन।
नैव वाच्यमुपादानभेदाद् भेदोपचारत:।।33।।
अतीतानागतेऽप्यर्थे सामान्यविनिबन्धना:।
श्रुतयो निविशन्ते सदसद्धर्म: कथं भवेत् !।।34।।
उपचारात् तदिष्टं चेद् वर्त्तमानघटस्य का।
प्रत्यासत्तिरभावेन या पटादौ न विद्यते।।35।।
बुद्धेरस्खलिता वृत्तिर्मुख्यारोपितयो: सदा।
सिंहे माणवके तद्वद् घोषणाप्यस्ति लौकिकी।।36।।
यत्र रूढ्याऽसदर्थोऽपि जनै: शब्दो निवेशित:।
स मुख्यस्तत्र तत्साम्याद् गौणोऽन्यत्र स्खलद्गति:।।37।।
यथा भावेऽप्यभावाख्यां यथाकल्पनमेव वा।
कुर्यादशक्ते शक्ते वा प्रधानादिश्रुतिं जन:।।38।।
शब्देभ्यो यादृशी बुद्धिर्नष्टेऽनष्टेऽपि दृश्यते।
तादृश्येव, सदर्थानां नैतच्छ्रोत्रादिचेतसाम्।।39।।
सामान्यमात्रग्रहणात् सामान्यं चेतसोर्द्वयो:।
तस्यापि केवलस्य प्राग् ग्रहणं विनिवारितम् ।।40।।
परस्परविशिष्टानामविशिष्टं कथं भवेत् !।
तथा द्विरूपतायां वा तद् वस्त्वेकं कथं भवेत् ! ।।41।।
ताभ्यां तदन्यदेव स्याद् यदि रूपं समं तयो:।
तयोरिति न सम्बन्धो व्यावृत्तिस्तु न दुष्यति।।42।।
तस्मात् समानतैवास्मिन् सामान्येऽवस्तुलक्षणम्।
कार्यं चेत् तदनेकं स्यान्नश्वरं च न तन्मतम्।।43।।
वस्तुमात्रानुबन्धित्वाद् विनाशस्य न नित्यता।
असम्बन्धश्च जातीनामकार्यत्वादरूपता।।44।।

यच्च वस्तुबलाज्ज्ञानं जायते तदपेक्षते।
न संकेतं न सामान्यबुद्धिष्वेतद् विभाव्यते।।45।।
याप्यभेदानुगा बुद्धि: काचिद् वस्तुद्वयेक्षणे।
संकेतेन विना सार्थप्रत्यासत्तिनिबन्धना।।46।।
प्रत्यासत्तिर्विना जात्या यथेष्टा चक्षुरादिषु।
ज्ञानकार्येषु जातिर्वा यथान्वेति विभागत:।।47।।
कथञ्चिदपि विज्ञाने तद्रूपानवभासत:।
यदि नामेन्द्रियाणां स्याद् द्रष्टा भासेत तद्वपु:।।48।।
रूपवत्त्वात्; न जातीनां केवलानामदर्शनात्।
व्यक्तिग्रहे च तच्छब्दरूपादन्यन्न दृश्यते।।49।।
ज्ञानमात्रार्थकरणेऽप्ययोग्यमत एव तत्।
तदयोग्यतयाऽरूपं तद्ध्यवस्तुषु लक्षणम्।।50।।
यथोक्तविपरीतं यत् तत् स्वलक्षणमिष्यते।
सामान्यं त्रिविधम्, तच्च भावाभावोभयाश्रयात्।।51।।
यदि भावाश्रयं ज्ञानं भावे भावानुबन्धत:।
नोक्तोत्तरत्वाद् दृष्टत्वाद्; अतीतादिषु चान्यथा।।52।।
भावधर्मत्वहानिश्चेत् भावग्रहणपूर्वकम्।
तज्ज्ञानमित्यदोषोऽयम्, मेयं त्वेकं स्वलक्षणम्।।53।।
तस्मादर्थक्रियासिद्धे: सदसत्ताविचारणात्।
तस्य स्वपररूपाभ्यां गतेर्मेयद्वयं मतम्।।54।।

{अनुमानविचार:}

अयथाभिनिवेशेन द्वितीया भ्रान्तिरिष्यते।
गतिश्चेत् पररूपेण न च भ्रान्ते: प्रमाणता।।55।।
अभिप्रायाविसंवादादपि भ्रान्ते: प्रमाणता।
गतिरप्यन्यथा दृष्टा, पक्षश्चायं कृतोत्तर:।।56।।
मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतो:।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति।।57।।
यथा तथाऽयथार्थत्वेऽप्यनुमानतदाभयो:।
अर्थक्रियानुरोधेन प्रमाणत्वं व्यवस्थितम्।।58।।
बुद्धिर्यत्रार्थसामर्थ्यादन्वयव्यतिरेकिणी।
तस्य स्वतन्त्रं ग्रहणमतोऽन्यद् वस्त्वतीन्द्रियम्।।59।।

तस्याद्दृष्टात्मरूपस्य गतेरन्योऽर्थ आश्रय:।
तदाश्रयेण सम्बन्धी यदि स्याद् गमकस्तदा।।60।।
गमकानुगसामान्यरूपेणैव तदा गति:।
तस्मात् सर्व: परोक्षोऽर्थो विशेषेण न गम्यते।।61।।
या च सम्बन्धिनो धर्माद् भूतिर्धर्मिणि ज्ञायते।
सानुमानं परोक्षाणामेकान्तेनैव साधनम्।।62।।
न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य सम्भव:।
तस्मात् प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते।।63।।
त्र्येकसंख्यानिरासो वा प्रमेयद्वयदर्शनात्।
एकमेवाप्रमेयत्वादसतश्चेन्मतं च न:।।64।।
अनेकान्तोऽप्रमेयत्वेऽसद्भावस्य विनिश्चय:।
तन्निश्चयप्रमाणं वा द्वितीयम्; नाक्षजा मति:।।65।।
अभावेऽर्थबलाज्जातेरर्थशक्त्यनपेक्षणे।
व्यवधानादिभावेऽपि जायेतेन्द्रियजा मति:।।66।।
अभावे विनिवृत्तिश्चेत् प्रत्यक्षस्यैव निश्चय:।
विरुद्धं सैव वा लिङ्गमन्वयव्यतिरेकिणी।।67।।
सिद्धं च परचैतन्यप्रतिपत्ते: प्रमाद्वयम्।
व्यवहारादौ प्रवृत्तेश्च सिद्धस्तद्भावनिश्चय:।।68।।
प्रमाणमविसंवादात् तत् क्वचिद् व्यभिचारत:।
नाश्वास इति चेल्लिङ्गं दुर्दृष्टिरेतदीदृशम्।।69।।
यत: कदाचित् सिद्धाऽस्य प्रतीतिर्वस्तुन: क्वचित्।
तदवश्यं ततो जातं तत्स्वभावोऽपि वा भवेत्।।70।।
स्वनिमित्तात् स्वभावाद् वा विना नार्थस्य सम्भव:।
यच्च रूपं तयोर्दृष्टं तदेवान्यत्र लक्षणम्।।71।।
स्वभावे स्वनिमित्ते वा दृश्ये दर्शनहेतुषु।
अन्येषु सत्स्वदृश्ये च सत्ता वा तद्वत: कथम्!।।72।।
अप्रामाण्ये च सामान्यबुद्धेस्तल्लोप आगत:।
प्रेत्यभाववद्; अक्षैस्तत् पर्यायेण प्रतीयते।।73।।
तच्च नेन्द्रियशक्त्यादावक्षबुद्धेरसम्भवात्।
अभावप्रतिपत्तौ स्याद् बुद्धेर्जन्मानिमित्तकम्।।74।।
स्वलक्षणे च प्रत्यक्षमविकल्पतया विना।
विकल्पेन न सामान्यग्रहस्तस्मिंस्ततोऽनुमा।।75।।

प्रमेयनियमे वर्णानित्यता न प्रतीयते।
प्रमाणमन्यत् तद्बुद्धिर्विना लिङ्गेन सम्भवात्।।76।।
विशेषदृष्टे लिङ्गस्य सम्बन्धस्याप्रसिद्धित:।
तत् प्रमाणान्तरं मेयबहुत्वाद् बहुतापि वा।।77।।
प्रमाणानामनेकस्य वृत्तेरेकत्र वा यथा।
विशेषदृष्टेरेकत्रिसंख्यापोहो न वा भवेत्।।78।।
विषयानियमादन्यप्रमेयस्य च सम्भवात?
योजनाद् वर्णसामान्ये नायं दोष: प्रसज्यते।।79।।
नावस्तुरूपं तस्यैव तथा सिद्धे:* प्रसाधनात्।
अन्यत्र नान्यसिद्धिश्चेन्न तस्यैव प्रसिद्धित:।।80।। पा0टि0- *सिद्धे-रा0)
यो हि भावो यथाभूतो स तादृग्लिङ्गचेतस:।
हेतुस्तज्जा तथाभूते तस्माद् वस्तुनि लिङ्गिधी:।।81।।
लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि।
प्रतिबन्धात् तदाभासशून्ययोरप्यवञ्चनम्।।82।।
तद्रूपाध्यवसायाच्च तयोस्तद्रूपशून्ययो:।
तद्रूपावञ्चकत्वेऽपि कृता भ्रान्तिव्यवस्थिति:।।83।।
तस्माद् वस्तुनि बोद्धव्ये व्यापकं व्याप्यचेतस:।
निमित्तं तत्स्वभावो वा कारणम्, तञ्च तद्विय:।।84।।

{अनुपलब्धिविचार:}

प्रतिषेधस्तु सर्वत्र साध्यतेऽनुपलम्भत:।
सिद्धिं प्रमाणैर्वदतामर्थादेव विपर्ययात्।।85।।
दृष्टा विरुद्धधर्मोक्तिस्तस्य तत्कारणस्य वा।
निषेधे यापि तस्यैव साऽप्रमाणत्वसूचना।।86।।
अन्यथैकस्य धर्मस्य स्वभावोक्त्या परस्य तत्।
नास्तित्वं केन गम्येत; विरोधाच्चेद्, असावपि।।87।।
सिद्ध: केनासहस्थानादिति चेत्, तत् कुतो मतम् !।
दृश्यस्य दर्शनाभावादिति चेत्, साऽप्रमाणता।।88।।
तस्मात् स्वशब्देनोक्तापि साऽभावस्य प्रसाधिका।
यस्याप्रमाणं साऽवाच्यो निषेधस्तेन सर्वथा।।89।।
एतेन तद्विरुद्धार्थकार्योक्तिरुपवर्णिता।
प्रयोग: केवलं भिन्न: सर्वत्रार्थो न भिद्यते।।90।।
विरुद्धं तच्च सोपायमविधायापिधाय च।

प्रमाणोक्तिर्निषेधे या न साम्नायानुसारिणी।।91।।
उक्त्यादे: सर्ववित्प्रेत्यभावादिप्रतिषेधवत्।
अतीन्द्रियाणामर्थानां विरोधस्याप्रसिद्धित:।।92।।
बाध्यबाधकभाव: क: स्यातां यद्युक्तिसंविदौ।
तादृशोऽनुपलब्धेश्चेद्, उच्यतां सैव साधनम्।।93।।
अनिश्चयकरं प्रोक्तमीदृक् क्वानुपलम्भनम्।
तन्नात्यन्तपरोक्षेषु सदसत्ताविनिश्चयौ।।94।।
भिन्नोऽभिन्नोऽपि वा धर्म: स विरुद्ध: प्रयुज्यते*।
यथाऽग्निरहिमे साध्ये सत्ता वा जन्मबाधनी।।95।। (पा0टि0- *प्रसज्यते-पाठा0)
यथा वस्त्वेव वस्तूनां साधने साधनं मतम्।
तथा वस्त्वेव वस्तूनां स्वनिवृत्तौ निवर्त्तकम्।।96।।
एतेन कल्नान्यस्तो यत्र क्वचन सम्भवात्।
धर्म: पक्षसपक्षान्यतरत्वादिरपोदित:।।97।।
तत्रापि व्यापको धर्मो निवृत्तेर्गमको मत:।
व्याप्यस्य स्वनिवृत्तिश्चेत् परिच्छिन्ना कथञ्चन।।98।।
यदप्रमाणताऽभावे लिङ्गं तस्यैव कथ्यते।
तदत्यन्तविमूढार्थम्; आगोपालमसंवृते:*।।99।।(पा0टि0- *मसंवृत्ते:-रा0। एवं वृत्तावपि)
एतावन्निश्चयफलमभावेऽनुपलम्भनम्।
तच्च हेतौ स्वभावे वाऽदृश्ये दृश्यतया मते।।100।।
अनुमानादनित्यादेर्ग्रहणेऽयं क्रमो मत:।
प्रामाण्यमेव नान्यत्र गृहीतग्रहणान्मतम्।।101।।
नान्यास्यानित्यता भावात् पूर्वं सिद्ध: स चैन्द्रियात्।
नानेकरूपो वाच्योऽसौ; वाच्यो धर्मो विकल्पज:।।102।।
सामान्याश्रयसंसिद्धौ सामान्यं सिद्धमेव तत्।
तदसिद्धौ तथास्यैव हयनुमानं प्रवर्तते।।103।।
क्वचित् तदपरिज्ञानं सदृशापरसम्भवात्।
भ्रान्तेरपश्यतो भेदं मायागोलकभेदवत्।।104।।
तथा हयलिङ्गमाबालमसंश्लिष्टोत्तरोदयम्।
पश्यन् परिच्छिनत्त्येव दीपादि नाशिनं जन:।।105।।
भावस्वभावभूतायामपि शक्तौ फलेऽदृश:।
अनानन्तर्यतो मोहो विनिश्चेतुरपाटवात्।।106।।
तस्यैव विनिवृत्त्यर्थमनुमानोपवर्णनम्।

व्यवस्यन्तीक्षणादेव सर्वाकारान् महाधिय:।।107।।
व्यावृत्ते सर्वतस्तस्मिन् व्यावृत्तिविनिबन्धना।
बुद्धयोऽर्थे प्रवर्त्तन्तेऽभिन्ने भिन्नाश्रया इव।।108।।
यथाचोदनमाख्याश्च सोऽसति भ्रान्तिकारणे।
प्रतिभा: प्रतिसन्धत्ते स्वानुरूपा: स्वभावत:।।109।।
सिद्धोऽत्राप्यथवा ध्वंसो लिङ्गादनुपलम्भनात्।
प्राग्भूत्वा हयभवन्* भावोऽनित्य इत्यभिधीयते।।110।। (पा0टि0- *हयमवद्-रा0)
यस्योभयान्तव्यवधिसत्तासम्बन्धवाचिनी।
अनित्यताश्रुतिस्तेन तावन्ताविति कौ स्मृतौ।।111।
प्राक् पश्चादप्यभावश्चेत् स एवानित्यता न किम्!
षष्ठ्याद्ययोगादिति चेद् अन्तयो: स कथं भवेत् !।।112।।
सत्ता सम्बन्धयोर्ध्रौव्यादन्ताभ्यां न विशेषणम्।
अविशेषणमेव स्यादन्तौ चेत् कार्यकारणे।।113।।
असम्बन्धान्न भावस्य प्रागभावं स वाञ्छति।
तदुपाधिसमाख्याने तेऽप्यस्य च न सिध्यत:।।114।।
सत्ता स्वकारणाश्लेषकरणात् कारणं किल।
सा सत्ता स च सम्बन्धो नित्यौ कार्यमथेह किम्।।115।।
यस्याभाव: क्रियेतासौ न भाव: प्रागभाववान्।
सम्बन्धानभ्युपगमान्नित्यं विश्वमिदं तत:।।116।।
तस्मादनर्थास्कन्दिन्योऽभिन्नार्थाभिमतेष्वपि।
शब्देषु वाच्यभेदिन्यो व्यतिरेकास्पदं धिय:।।117।।
विशेषप्रत्यभिज्ञानं न प्रतिक्षणभेदत:।
न वा विशेषविषयं दृष्टसाम्येन तद्ग्रहात्।।118।।
निदर्शनं तदेवेति सामान्याग्रहणं यदि।
निदर्शनत्वात् सिद्धस्य प्रमाणेनास्य किं पुन:।।119।।
विस्मृत्वाददोषश्चेत् तत एवानिदर्शनम्।
दृष्टे तद्भावसिद्धिश्चेत् प्रमाणाद्; अन्यवस्तुनि।।120।।
तत्त्वारोपे विपर्यासस्तत्सिद्धेरप्रमाणता।
प्रत्यक्षेतरयोरैक्यादेकसिद्धिर्द्वयोरपि।।121।।
सन्धीयमानं चान्येन व्यवसायं स्मृतिं विदु:।
तल्लिङ्गापेक्षणान्नो चेत् स्मृतिर्न व्यभिचारत:।।122।।

{प्रत्यक्षविचारः}

{लक्षणविप्रतिपत्तिनिराकरणम्}

प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति।
प्रत्यात्मवेद्यः सर्वेषां विकल्पो नामसंश्रयः।।123।।
संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना।
स्थितोऽपि चक्षुषा रूपमीक्षते साक्षजा मतिः।।124।।
पुनर्विकल्पयन् किञ्चिदासीन्मे कल्पनेदृशी।
वेत्ति चेति न पूर्वोक्तावस्थायामिन्द्रियाद् गतौ।।125।।
एकत्र दृष्टो भेदो हि क्वचिन्नान्यत्र दृश्यते।
न तस्माद् भिन्नमस्त्यन्यत् सामान्यं बुद्ध्यभेदतः।।126।।
तस्माद् विशेषविषया सर्वैवेन्द्रियजा मतिः।
न विशेषेषु शब्दानां प्रवृत्तावस्ति सम्भवः।।127।।
अनन्वयाद् विशेषाणां सङ्केतस्याप्रवृत्तितः।
विषयो यश्च शब्दानां संयोज्येत स एव तैः।।128।।
अस्येदमिति सम्बन्धे यावर्थौ प्रतिभासिनौ।
तयोरेव हि सम्बन्धो न तदेन्द्रियगोचरः।।129।।
विशदप्रतिभासस्य तदार्थस्याविभावनाद्।
विज्ञानाभासभेदो* हि* पदार्थानां विशेषकः।।130।।(पा0टि0- **0भेदश्च-रा0)
चक्षुषाऽर्थावभासेऽपि यं परोऽस्येति शंसति।
स एव योज्यते शब्दैर्न खल्विन्द्रियगोचरः।।131।।
अव्यापृतेन्द्रियस्यान्यवाङ्मात्रेणाविभावनात्।
न चानुदितसम्बन्धः स्वयं ज्ञानप्रसङ्गतः।।132।।
मनसो युगपद्-वृत्तेः सविकल्पाविकल्पयोः।
विमूढो लघुवृत्तेर्वा तयोरैक्यं व्यवस्यति।।133।।
विकल्पव्यवधानेन विच्छिन्नं दर्शनं भवेत्।
इति चेद्, भिन्नजातीयविकल्पेऽन्यस्य वा कथम्।।134।।
अलातदृष्टिवद् भावपक्षश्चेद् बलवान् मतः।
अन्यत्रापि समानं तद् वर्णयोर्वा सकृच्छ्रुतिः।।135।।

{न्यायमतदूषणम्}

सकृत् सङ्गतशब्दार्थैष्विन्द्रियेष्विह सत्स्वपि।
पञ्चभिर्व्यवधानेऽपि भात्यव्यवहितेव या।।136।।
सा मतिर्नामपर्यन्तक्षणिकज्ञानमिश्रणात्।

विच्छिन्नाभेति तच्चित्रं तस्मात् सन्तु सकृद्धियः।।137।।
प्रतिभासाविशेषश्च सान्तरानन्तरे कथम्।
शुद्धे मनोविकल्पे च न क्रमग्रहणं भवेत्।।138।।
योऽग्रहः सङ्गतेऽप्यर्थे क्वचिदासक्तचेतसः।
सक्त्यान्योत्पत्तिवैगुण्याच्चोद्यं वै तद् द्वयोरपि।।139।।
शीघ्रवृत्तेरलातादेरन्वयप्रतिघातिनी।
चक्रभ्रान्तिं दृगाधत्ते न दृशां घटनेन सा।।140।।

{शङ्करस्वामिप्रभृतिमतखण्डनम्}

केचिदिन्द्रियजत्वादेर्बालधीवदकल्पनाम्।
आहुर्बालाविकल्पे च हेतुं संकेतमन्दताम्।।141।।
तेषां प्रत्यक्षमेव स्याद् बालानामविकल्पनात्।
संकेतोपायविगमात् पश्चादपि भवेन्न सः।।142।।
मनो व्युत्पन्नसंकेतमस्ति तेन स चेन्मतः।
एवमिन्द्रियजेऽपि स्याद् शेषवच्चेदमीदृशम्।।143।।
यदेव साधनं बाले तदेवात्रापि कथ्यताम्।
साम्यादक्षधियामुक्तमनेनानुभवादिकम्।।144।।

{सामान्यनिराकरणम्}

विशेषणं विशेष्यञ्च सम्बन्धं लौकिकीं स्थितिम्।
गृहीत्वा सङ्कलय्यैतत् तथा प्रत्येति नान्यथा।।145।।
यथा दण्डिनि जात्यादेर्विवेकेनानिरूपणात्।
तद्वता योजना नास्ति कल्पनाप्यत्र नास्त्यतः।।146।।
यदप्यन्वयि विज्ञानं शब्दव्यक्त्यवभासि तत्।
वर्णाकृत्यक्षराकारशून्यं गोत्वं हि वर्ण्यते।।147।।
समानत्वेऽपि तस्यैव नेक्षणं नेत्रगोचरे।
प्रतिभासद्वयाभावात् बुद्धेर्भेदश्च दुर्लभः।।148।।
समवायाग्रहादक्षैः सम्बन्धादर्शनं स्थितिम्।

{अवयविनिराकरणम्}

पटस्तन्तुष्विहेत्यादिशब्दाश्चेमे स्वयं कृताः।।149।।
शृङ्गं गवीति लोके स्यात् शृङ्गे गौरित्यलौकिकम्।
गवाख्यपरिशिष्टाङ्गविच्छेदानुपलम्भनात्।।150।।
तैस्तन्तुभिरियं शाटीत्युत्तरं कार्यमुच्यते।
तन्तुसंस्कारसम्भूतं नैककालं कथञ्चन।।151।।

कारणारोपत: कश्चिद् एकापोद्धारतोऽपि वा।
तन्त्वाख्यां वर्तयेत् कार्ये दर्शयन् नाश्रयं श्रुते:।।152।।
उपकार्योपकारित्वं विच्छेदाद् दृष्टिरेव वा।
मुख्यं यदस्खलज्ज्ञानमादिसंकेतगोचर:।।153।।

{अनुमानतो न जातिसिद्धि:}

अनुमानं च जात्यादौ वस्तुनो नास्ति भेदिनि।
सर्वत्र व्यपदेशो हि दण्डादेरपि सांवृतात्।।154।।
वस्तुप्रासादमालादिशब्दाश्चान्यानपेक्षिण:।
गेहो यद्यपि संयोगस्तन्माला किन्नु* तद् भवेत्।।155।।(पा0टि0-*किन्तु- रा0। एवं वृत्तावपि।)
जातिश्चेद् गेह एकोऽपि मालेत्युच्येत वृक्षवत्।
मालाबहुत्वे तच्छब्द: कथं जातेरजातित:।।156।।
मालादौ च महत्त्वादिरिष्टो यश्चौपचारिक:।
मुख्याविशिष्टविज्ञानग्राह्यत्वान्नौपचारिक:।।157।।
अनन्यहेतुता तुल्या सा मुख्याभिमतेष्वपि।
पदार्थशब्द: कं हेतुमन्यं षट्सु* समीक्षते।।158।। (पा0टि0-*षटकं-रा0।)
यो यथा रूढित:* सिद्धस्तत्साम्याद् यस्तथोच्यते।।
मुख्यो** गौणश्च भावेष्वप्यभावस्योपचारत:।।159।।(पा0टि0- *रूठित:-रा0। ** यत्र-रा0)
संकेतान्वयिनी रूढिर्वक्तुरिच्छान्वयी च स:।
क्रियते व्यवहारार्थं छन्द:शब्दांशनामवत्*।।160।। (पा0टि0- *शब्दाङ्ग:-पाठा0)
वस्तुधर्मतयैवार्थास्तादृग्विज्ञानकारणम्।
भेदेऽपि यत्र तज्ज्ञानं* ताँस्तथा प्रतिपद्यते।।161।। (पा0टि0-*तज्ज्ञानात्-रा0)
ज्ञानान्यपि तथा भेदेऽभेदप्रत्यवमर्शने।
इत्यतत्कार्यविश्लेषस्यान्वयो नैकवस्तुन:।।162।।
वस्तूनां विद्यते तस्मात् तन्निष्ठा वस्तुनि श्रुति:।

{अन्यापोहविचार:}

बाह्यशक्तिव्यवच्छेदनिष्ठाभावेऽपि तच्छ्रुति:।।163।।
विकल्पप्रतिबिम्बेषु तन्निष्ठेषु निबध्यते।
ततोऽन्यापोहनिष्ठत्वादुक्तान्यापोहकृत् श्रुति:।।164।।
व्यतिरेकीव यज्ज्ञाने भात्यर्थप्रतिबिम्बकम्।
शब्दात् तदपि नार्थात्मा भ्रान्ति: सा वासनोद्भवा*।।165।।(पा0टि0-*-वासनामयी-पाठा0।)
तस्याभिधाने श्रुतिभिरर्थे कोंऽशोऽवगम्यते।

तस्यागतौ च संकेतक्रिया व्यर्था तदर्थिका।।166।।
शब्दोऽर्थांशं* कमाहेति* तत्रान्यापोह उच्यते।
आकार: स च नार्थेऽस्ति तं वदन्नर्थभाक् कथम्।।167।।(पा0टि0- **शब्दोऽर्थांशकमाहेति-रा0)
शब्दस्यान्वयिन: कार्यमर्थेनान्वयिना स च।
अनन्वयी धियोऽभेदाद् दर्शनाभ्यासनिर्मित:।।168।।
तद्रूपारोपगत्यान्यव्यावृत्ताधिगते: पुन:।
शब्दार्थोऽर्थ:* स एवेति वचने न विरुध्यते।।169।। (पा0टि0- *शब्दार्थार्थ:-रा0)
मिथ्यावभासिनो वैते प्रत्यया: शब्दनिर्मिता:।
अनुयान्तीममर्थांशमिति चापोहकृत् श्रुति:।।170।।
तस्मात् संकेतकालेऽपि; निर्दिष्टार्थेन संयुत:।
स्वप्रतीतिफलेनान्यापोह: सम्बध्यते श्रुतौ।।171।।
अन्यत्रादृष्ट्यत्वात् क्वचित्तद्दृष्ट्यपेक्षणात्।
श्रुतौ सम्बध्यतेऽपोहो नैतद् वस्तुनि युज्यते।।172।।
तस्माद् जात्यादितद्योगा नार्थे तेषु च न श्रुति:।
संयुज्यतेऽन्यव्यावृत्तौ *शब्दानामेव योजनात्।।173।। (पा.टि.- *संजोज्यते-रा.।सम्बध्यते-पाठा.)

{प्रत्यक्षे शब्दकल्पनानिराकरणम्}

संकेतस्मरणोपायं दृष्टसंकलनात्मकम्।
पूर्वापरपरामर्शशून्ये तच्चाक्षुषे कथम्।।174।।
अन्यत्रगतचित्तोऽपि चक्षुषा रूपमीक्षते।
तत्संकेताग्रहस्तत्र स्पष्टस्तज्जा च कल्पना।।175।।
जायन्ते कल्पनास्तत्र यत्र शब्दो निवेशित:।
तेनेच्छात: प्रवर्त्तेरन् नेक्षेरन् बाह्यमक्षजा:।।176।।
रूपं रूपमितीक्षेत तद्धियं किमितीक्षते।
अस्ति चानुभवस्तस्या: सोऽविकल्प: कथं भवेत्।।177।।
तयैवानुभवे दृष्टं न विकल्पद्वयं सकृत्।
एतेन तुल्यकालान्यविज्ञानानुभवो गत:।।178।।
स्मृतिर्भवेदतीते च साऽगृहीते कथं भवेत्।
स्याच्चान्यधीपरिच्छेदाभिन्नरूपा स्वबुद्धिधी:।।179।।
अतीतमपदृष्टान्तमलिङ्गज्चार्थवेदनम्।
सिद्धं तत्केन तस्मिन् हि न प्रत्यक्षं न लैङ्गिकम्।।180।।
तत्स्वरूपावभासिन्या बुद्ध्यानन्तरया यदि।
रूपादिरिव गृह्येत; न स्यात् तत्पूर्वधीग्रह:।।181।।

सोऽविकल्प: स्वविषयो विज्ञानानुभवो यथा।
अशक्यसमयं तद्वदन्यदप्यविकल्पकम्।।182।।
सामान्यवाचिन: शब्दास्तदेकार्था च कल्पना।
अभावे निर्विकल्पस्य विशेषाधिगम: कथम्।।183।।
अस्ति चेन्निर्विकल्पं च किञ्चित् तत्तुल्यहेतुकम्।
सर्वं तथैव हेतोर्हि भेदाद् भेद: फलात्मनाम्।।184।।
अनपेक्षितबाह्यार्था योजना समयस्मृते:।
तथानपेक्ष्य समयं वस्तुशक्त्यैव नेत्रधी:।।185।।
संकेतस्मरणापेक्षं रूपं यद्यक्षचेतसि।
अनपेक्ष्य न चेच्छक्तं स्यात् स्मृतावेव लिंगवत्।।186।।
तस्यास्तत्संगमोत्पत्तेरक्षधी: स्यात् स्मृतेर्न वा।
तत: कालान्तरेऽपि स्यात् क्वचिद् व्याक्षेपसम्भवात्।।187।।
क्रमेणोभयहेतुश्चेत् प्रागेव स्यादभेदत:।
अन्योऽक्षबुद्धिहेतुश्चेत् स्मृतिस्तत्राप्यनर्थिका।।188।।
यथासमितसिद्ध्यर्थमिष्यते समयस्मृति:।
भेदश्चासमितो ग्राह्य: स्मृतिस्तत्र किमर्थिका। ! ।।189।।
सामान्यमात्रग्रहणे भेदापेक्षा न युज्यते।
तस्माच्चक्षुश्च रूपं च प्रतीत्योदेति नेत्रधी:।।190।।
साक्षाच्च* ज्ञानजनने समर्थो विषयोऽक्षवत्। (पा0टि0-*-साक्षाच्चेत्-रा0)

{प्रत्यक्षभेदा:}

{इन्द्रियप्रत्यक्षम्}

अथ कस्माद् द्वयाधीनजन्म तत् तेन नोच्यते।।191।।
समीक्ष्य गमकत्वं हि व्यपदेशे नियुज्यते*। (पा0टि0- *न गृह्यते-रा0)
तच्चाक्षव्यपदेशेऽस्ति तद्धर्मश्च नियोज्यताम्।।192।।
ततो लिंगस्वभावोऽत्र व्यपदेशे नियोज्यताम्।
निवर्त्तते व्यापकस्य स्वभावस्य निवृत्तित:।।193।।
सञ्चित: समुदाय: स सामान्यं तत्र चाक्षधी:।
सामान्यबुद्धिश्चावश्यं विकल्पेनानुबध्यते?।।194।।
अर्थान्तराभिसम्बन्धाज्जायन्ते येऽणवोऽपरे।
उक्तास्ते सञ्चितास्ते हि निमित्तं ज्ञानजन्मन:।।195।।
अणूनां स विशेषश्च नान्तरेणापरानणून्।
तदेकानियमाज्ज्ञानमुक्तं सामान्यगोचरम्।।196।।

अथैकायतनत्वेऽपि नानेकं दृश्यते सकृत्।
सकृद्ग्रहावभास: किं वियुक्तेषु तिलादिषु।।197।।
प्रयुक्तं लाघवञ्चात्र तेष्वेव क्रमपातिषु।
किं नाक्रमग्रहस्तुल्यकाला: सर्वाश्च बुद्धय:।।198।।
काश्चित् तास्वक्रमाभासा: क्रमवत्योऽपराश्च किम्।
सर्वार्थग्रहणे तस्मादक्रमोऽयं प्रसज्यते।।199।।
नैकं चित्रपतंगादि रूपं वा दृश्यते कथम्।
चित्रं तदेकमिति चेदिदं चित्रतरं तत:।।200।।
नैकं स्वभावं चित्रं हि मणिरूपं यथैव तत्।
नीलादिप्रतिभासश्च तुल्यश्चित्रपटादिषु।।201।।
तत्रावयवरूपं चेत् केवलं दृश्यते तथा।
नीलादीनि निरस्यान्यच्चित्रं चित्रं यदीक्षसे।।202।।
तुल्यार्थाकारकालत्वेनोपलक्षितयोर्द्वयो:
नानार्था क्रमवत्येका किमेकार्थाऽक्रमापरा।।203।।
वैश्वरूप्याद् धियामेव भावानां विश्वरूपता।
तच्चेदनङ्गं केनेयं सिद्धा भेदव्यवस्थिति:!।।204।।
विजातीनामनारम्भादालेख्यादौ न चित्रधी:।
अरूपत्वान्न संयोगश्चित्रो भक्तेश्च नाश्रय:।।205।।
प्रत्येकमविचित्रत्वाद् गृहीतेषु क्रमेण च।
न चित्रधीसङ्कलनमनेकस्यैकयाऽग्रहात्।।206।।
नानार्थैका भवेत् तस्मात् सिद्धाऽतोऽप्यविकल्पिका।
विकल्पयन्नेकमर्थं* यतोऽन्यदपि पश्यति।।207।।
(पा0टि0- *विकल्पन्नायेकार्थं-रा0। विकल्पयन्नप्येकार्थं-पाठा0)

{चित्रैकत्वविचार:}

चित्रावभासेष्वर्थेषु यद्येकत्वं न युज्यते।
सैव तावत् कथं बुद्धिरेका चित्रावभासिनी।।208।।
इदं वस्तुबलायातं यद् वदन्ति विपश्चित:।
यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते* तथा तथा।।209।।(पा0टि0- *विविच्यन्ते-पाठा0)
किं स्यात् सा चित्रतैकस्याम्; न स्यात् तस्यां मतावपि।
यदीदं स्वयमर्थानां रोचते तत्र के वयम्।।210।।
तस्मान्नार्थेषु न ज्ञाने स्थूलाभासस्तदात्मन:।
एकत्र प्रतिषिद्धत्वाद् बहुष्वपि न सम्भव:।।211।।

परिच्छेदोऽन्तरन्योऽयं भागो बहिरिव स्थित:।
ज्ञानस्याभेदिनौ भिन्नौ प्रतिभासो हयुपप्लव:।।212।।
तत्रैकस्याप्यभावेन द्वयमप्यवहीयते।
तस्मात् तदेव तस्यापि तत्त्वं या द्वयशून्यता।।213।।
तद्भेदाश्रयिणी चेयं भावानां भेदसंस्थिति:।
तदुपप्लवभावे च तेषां भेदोऽप्युपप्लव:।।214।।
न ग्राह्यग्राहकाकारबाह्यमस्ति च लक्षणम्।
अतो लक्षणशून्यत्वान्नि:स्वभावा: प्रकाशिता:।।215।।
व्यापारोपाधिकं सर्वं स्कन्धादीनां विशेषत:।
लक्षणं स च तत्त्वं न तेनाप्येते विलक्षणा:।।216।।
यथास्वम्प्रत्ययापेक्षादविद्योपप्लुतात्मनाम्।
विज्ञप्तिर्वितथाकारा जायते तिमिरादिवत्।।217।।
असंविदिततत्त्वा च सा सर्वापरदर्शनै:।
असम्भवाद् विना तेषां ग्राह्यग्राहकविप्लवै:।।218।।
तदुपेक्षिततत्त्वार्थै: कृत्वा गजनिमीलनम्।
केवलं लोकबुद्ध्यैव बाह्यचिन्ता प्रतन्यते।।219।।
नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक्।
अशक्यदर्शन:; तं हि पतत्यर्थे विवेचयन्।।220।।
यद् यथा भासते ज्ञानं तत् तथैव प्रकाशते।
इति नामैकभाव: स्याच्चित्राकारस्य चेतसि*।।221।। (पा0टि0-*चेतस:- पाठा0)
पटादिरूपस्यैकत्वे तथा स्यादविवेकिता।
विवेकीनि निरस्यान्यदा विवेकि च नेक्षते*।।222।। (पा0टि0- *नेक्ष्यते-पाठा0)
को वा विरोधो बहव: सञ्जातातिशया: पृथक्*।
भवेयु: कारणं बुद्धेर्यदि नात्मेद्रियादिवत्।।223।। (पा0टि0-*सकृद्-पाठा0।)
हेतुभावाद् ऋते नान्या ग्राह्यता नाम काचन।
तत्र बुद्धिर्यदाकारा तस्यास्तद् ग्राह्यमुच्यते।।224।।
कथं वाऽवयवी ग्राह्य: सकृत् स्वावयवै: सह।
न हि गोप्रत्ययो दृष्ट: सास्नादीनामदर्शने।।225।।
गुणप्रधानाधिगम: सहाप्यभिमतो यदि।
सम्पूर्णाङ्गो न गृह्येत सकृन्नापि गुणादिमान्।।226।।
विवक्षापरतन्त्रत्वाद् विशेषणविशेष्ययो:।
यदङ्गभावेनोपात्तं तत् तेनैव हि गृह्यते।।227।।

स्वतो वस्त्वन्तराभेदाद् गुणादेर्भेदकस्य च।
अग्रहादेकबुद्धि: स्यात् पश्यतोऽपि परापरम्।।228।।
गुणादिभेदग्रहणान्नानात्वप्रतिपद् यदि।
अस्तु नाम तथाप्येषां भवेत् सम्बन्धिसङ्कर:।।229।।
शब्दादीनामनेकत्वात् सिद्धोऽनेकग्रह: सकृत्।
सन्निवेशग्रहायोगादग्रहे सन्निवेशिनाम्।।230।।
सर्वतो विनिवृत्तस्य विनिवृत्तिर्यतो यत:।
तद्भेदोन्नीतभेदा सा धर्मिणोऽनेकरूपता।।231।।
ते कल्पिता रूपभेदाद् निर्विकल्पस्य चेतस:।
न विचित्रस्य चित्राभा: कादाचित्कस्य गोचर:।।232।।
यद्यप्यस्ति सितत्वादि यादृगिन्द्रियगोचर:।
न सोऽभिधीयते शब्दैर्ज्ञानयो रूपभेदत:।।233।।
एकार्थत्वेऽपि बुद्धीनां नानाश्रयतया स चेत्।
श्रोत्रादिचित्तानीदानीं भिन्नार्थानीति तत् कुत:।।234।।
जातो नामाश्रयोऽन्योऽन्य: चेतसा तस्य वस्तुन:।
एकस्यैव कुतो रूपं भिन्नाकारावभासि तत्।।235।।
वृत्तेर्दृश्यपरामर्शेनाभिधानविकल्पयो:।
दर्शनात् प्रत्यभिज्ञानं गवादीनां निवारितम्।।236।।
अन्वयाच्चानुमानं यदभिधानविकल्पयो:।
दृश्ये गवादौ जात्यादेस्तदप्येतेन दूषितम्।।237।।
दर्शनान्येव भिन्नान्यप्येकां कुर्वन्ति कल्पनाम्।
प्रत्यभिज्ञानसंख्यातां स्वभावेनेति वर्णितम्।।238।।

{2- मानसप्रत्यक्षम्}

पूर्वानुभूतग्रहणे मानसस्याप्रमाणता।
अदृष्टग्रहणेऽन्धादेरपि स्यादर्थदर्शनम्।।239।।
क्षणिकत्वादतीतस्य दर्शनस्य* न सम्भव:। (पा0टि0-*दर्शने च-रा0)
वाच्यमक्षणिकत्वे स्याल्लक्षणं सविशेषणम्।।240।।
निष्पादितक्रिये कञ्चिद्* विशेषमसमादधत्।
कर्मण्यैन्द्रियमन्यद् वा साधनं किमितीष्यते।।241।। (पा0टि0-*किञ्चिद-रा0।)
सकृद् भावश्च सर्वासां धियां तद्भावजन्मनाम्।
अन्यैरकार्यभेदस्य तदपेक्षाविरोधत:।।242।।
तस्मादिन्द्रियविज्ञानानन्तरप्रत्ययोद्भवम्।

मनोऽन्यमेव गृह्णाति विषयं नान्यदृक् तत:।।243।।
स्वार्थान्वयार्थापेक्षैव हेतुरिन्द्रियजा मति:।
ततोऽन्यग्रहणेऽप्यस्य नियतग्राह्यता मता।।244।।
तदतुल्यक्रियाकाल: कथं स्वज्ञानकालिक:।
सहकारी भवेदर्थ इति चेदक्षचेतस: ?।।245।।
असत: प्रागसामर्थ्यात् पश्चाच्चानुपयोगत:।
प्राग्भाव: सर्वहेतूनां नातोऽर्थ: स्वधिया सह।।246।।
भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदु:।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम्।।247।।
कार्यं ह्यनेकहेतुत्वेऽप्यनुकुर्वदुदेति यत्।
तत् तेनाप्यत्र* तद्रूपं* गृहीतमिति चोच्यते।।248।। (पा0टि0- **तेनार्पिततद्रूपं-पाठा0)

{3- स्वसंवेदनप्रत्यक्षम्}

अशक्यसमयो ह्यात्मा रागादीनामनन्यभाक्।
तेषामत: स्वसंवित्तिर्न्नाभिजल्पानुषङ्गिणी।।249।।
अवेदका: परस्यापि ते स्वरूपं कथं विदु:।
एकार्थाश्रयिणा वेद्या विज्ञानेनेति केचन।।250।।
तदतद्रूपिणो भावास्तदतद्रूपहेतुजा:।
तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजम्।।251।।
सार्थे सतीन्द्रिये योग्ये यथास्वमपि चेतसि।
दृष्टं जन्म सुखादीनां तत् तुल्यं मनसामपि।।252।।
असत्सु सत्सु चैतेषु न जन्माजन्म वा क्वचित्।
दृष्टं सुखादेर्बुद्धेर्वा तत् ततो नान्यतश्च ते।।253।।
सुखदु:खादिभेदश्च तेषामेव विशेषत:।
तस्या एव यथा बुद्धेर्मान्द्यपाटवसंश्रया:।।254।।
यस्यार्थस्य निपातेन ते जाता धीसुखादय:।
मुक्त्वा तं प्रतिपद्येत सुखादीनेव सा कथम्!।।255।।
अविच्छिन्ना* न* भासेत तत्संवित्ति: क्रमग्रहे।
तल्लाघवाच्चेत् तत्तुल्यमित्यसंवेदनं न किम् !।।256।। (पा0टि0-*अविच्छिन्नाथ-रा0)
न चैकया द्वयज्ञानं नियमादक्षचेतस:।
सुखाद्यभावेऽप्यर्थाच्च जातेस्तच्छक्त्यसिद्धित:।।257।।
पृथक् पृथक् च सामर्थ्ये द्वयोर्नीलादिवत् सुखम्।
गृह्येत केवलम्; तस्य तद्धेत्वर्थमगृह्णत:।।258।।

न हि संवेदनं युक्तम्, अर्थेनैव सह ग्रहे।
किं सामर्थ्यं सुखादीनां नेष्टा धीर्यत् तदुद्भवा।।259।।
विनार्थेन सुखादीनां वेदने चक्षुरादिभि:।
रूपादि: स्त्र्यादिभेदोऽक्ष्णा न गृह्येत कदाचन।।260।।
न हि सत्यन्तरङ्गेऽर्थे शक्ते धीर्बाह्यदर्शनी।
अर्थग्रहे सुखादीनां तज्जानां स्यादवेदनम्।।261।।
धियोर्युगपदुत्पत्तौ तत्तद्विषयसम्भवात्।
सुखदु:खविदौ स्यातां सकृदर्थस्य सम्भवे।।262।।
सत्यान्तरेऽप्युपादाने ज्ञाने दु:खादिसम्भव:।
नोपादानं विरुद्धस्य तच्चैकमिति चेन्मतम्।।263।।
तदज्ञानस्य विज्ञानं केनोपादानकारणम्।
आधिपत्यं तु कुर्वीत तद्विरुद्धेऽपि दृश्यते।।264।
अक्ष्णोर्यथैक आलोको नक्तञ्चरतदन्ययो:।
रूपदर्शनवैगुण्यावैगुण्ये कुरुते सकृत्।।265।।
तस्मात् सुखादयोऽर्थानां स्वसंक्रान्तावभासिनाम्।
वेदका: स्वात्मनश्चैषामर्थेभ्यो जन्म केवलम्।।266।।
अर्थात्मा स्वात्मभूतो हि तेषां तैरनुभूयते।
तेनार्थानुभावख्यातिरालम्बस्तु तदाभता।।267।।

{तत्र साङ्ख्यमतनिराकरणम्}

कश्चिद् बहि:स्थितानेव सुखादीनप्रचेतनान्।
ग्राह्यानाह, न तस्यापि सकृद् युक्तो द्वयग्रह:।।268।।
सुखाद्यभिन्नरूपत्वान्नीलादेश्चेत् सकृद् ग्रह:।
भिन्नावभासिनोर्ग्राह्यं चेतसोस्तदभेदि किम्।।269।।
तस्याविशेषे बाह्यस्य भावनातारतम्यत:।
तारतम्यञ्च बुद्धौ स्यान्न प्रीतिपरितापयो:।।270।।
सुखाद्यात्मतया बुद्धेरपि यद्यविरोधिता।
स इदानीं कथं बाह्य: सुखाद्यात्मेति गम्यते ?।।271।।
अग्राह्यग्राहकत्वाच्चेद् भिन्नजातीययो: पुमान्।
अग्राहक: स्यात् सर्वस्य ततो हीयेत् भोक्तृता।।272।।
कार्यकारणतानेन प्रत्युक्ताऽकार्यकारणे।
ग्राह्यग्राहकताभावाद् भावेऽन्यत्रापि सा भवेत्।।273।।
तस्मात् त आन्तरा एव, संवेद्यत्वाच्च चेतना:।

संवेदनं न यद् रूपं न हि तत् तस्य वेदनम्।।274।।
अतत्स्वभावोऽनुभवो बौद्धांस्तान् सन्नवैति चेत्।
मुक्त्वाध्यक्षस्मृताकारां संवित्तिं बुद्धिरत्र का ।।275।।
ताँस्तानर्थानुपादाय सुखदु:खादिवेदनम्।
एकमाविर्भवद् दृष्टं न दृष्टं त्वन्यदन्तरा।।276।।
संसर्गादविभागश्चेदयोगोलोकवह्निवत्।
भेदाभेदव्यवस्थैवमुच्छिन्ना सर्ववस्तुषु।।277।।
अभिन्नवेदनस्यैक्यं यन्नैवं तद् विभेदवत्।
सिध्येदसाधनत्वेऽस्य न सिद्धं भेदसाधनम्।।278।।
भिन्नाभ: सितदु:खादिरभिन्नो बुद्धिवेदने।
अभिन्नाभे विभिन्ने चेत् भेदाभेदौ किमाश्रयौ!।।279।।
तिरस्कृतानां पटुनाप्येकदाऽभेददर्शनात्।
प्रवाहे वित्तिभेदानां सिद्धा भेदव्यवस्थिति:।।280।।

{4- योगिज्ञानप्रत्यक्षम}

प्रागुक्तं योगिनां ज्ञानं तेषां तद् भावनामयम्।
विधूतकल्पनाजालं स्पष्टमेवावभासते।।281।।
कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुता:।
अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव।।282।।
न विकल्पानुबद्धस्यास्ति स्फुटार्थावभासिता।
स्वप्नेऽपि स्मर्यते स्मार्त्तं न च तत् तादृगर्थवत्।।283।।
अशुभा पृथिवीकृत्स्नाद्यभूतमपि वर्ण्यते।
स्पष्टाभं निर्विकल्पच्च भावनाबलनिर्मितम्।।284।।
तस्माद् भूतमभूतं वा यद् यदेवाति* भाव्यते*।
भावनापरिनिष्पत्तौ तत् स्फुटाकल्पधीफलम्।।285।। (पा0टि0-*यदेवाभिभाव्यते-रा0)
तत्र प्रमाणं संवादि यत् प्राङ् निर्णीतवस्तुवत्।
तद् भावनाजं प्रत्यक्षमिष्टम् शेषा उपप्लवा:।286।।
शब्दार्थग्राहि यद् यत्र तज्ज्ञानं तत्र कल्पना।
स्वरूपं च न शब्दार्थस्तत्राध्यक्षमतोऽखिलम्।।287।।

{प्रत्यक्षाभासविचार:}

त्रिविधं कल्पनाज्ञानमाश्रयोपप्लवोद्भवम्।
अविकल्पकमेकं च प्रत्यक्षाभं चतुर्विधम्।।288।।
अनक्षजत्वसिद्ध्यर्थमुक्ते द्वे भ्रान्तिदर्शनात्।

सिद्धानुमादिवचनं साधनायैव पूर्वयो:।।289।।
संकेतसंश्रयान्यार्थसमारोपविकल्पने।
न प्रत्यक्षानुवृत्तित्वात् कदाचिद् भ्रान्तिकारणम्।।290।।
यथैवेयं परोक्षार्थकल्पना स्मरणात्मिका।
समयापेक्षिणी नार्थं प्रत्यक्षमध्यवस्यति।।291।।
तथानुभूतस्मरणमन्तरेण घटादिषु।
न प्रत्ययोऽनुयँस्तच्च प्रत्यक्षात् परिहीयते।।292।।
अपवादश्चतुर्थोऽत्र तेनोक्तमुपघातजम्।
केवलं तत्र तिमिरमुपघातोपलक्षणम्।।293।।
मानसं तदपीत्येके तेषां ग्रन्थो विरुध्यते।
नीलद्विचन्द्रादिधियां हेतुरक्षाण्यपीत्ययम्।।294।।
पारम्पर्येण हेतुश्चेदिन्द्रियज्ञानगोचरे।
विचार्यमाणे प्रस्तावो मानसस्येह कीदृश:! ।।295।।
किं वैन्द्रियं यदक्षाणां भावाभावानुरोधि चेत्।
तत् तुल्यं विक्रियावच्चेत् सैवेयं किं निषिध्यते!।।296।।
सर्पादिभ्रान्तिवच्चास्या: स्यादक्षविकृतावपि।
निवृत्तिर्न निवर्त्तेत निवृत्तेऽप्यक्षविप्लवे।।297।।
कदाचिदन्यसन्ताने तथैवार्प्येत वाचकै:।
दृष्टस्मृतिमपेक्षेत न भासेत परिस्फुटम्।।298।।
सुप्तस्य जाग्रतो वापि यैव धी: स्फुटभासिनी।
सा निर्विकल्पोभयथाप्यन्यथैव विकल्पिका।।299।।
तस्मात् तस्याविकल्पेऽपि प्रामाण्यं प्रतिषिध्यते।
विसंवादात् तदर्थं च प्रत्यक्षाभं द्विधोदितम्।।300।।

{प्रमाणफलविचार:}

क्रियासाधनमित्येव सर्वं सर्वस्य कर्मण:।
साधनं न हि तत् तस्य साधनं या क्रिया यत:।।301।।
तत्रानुभवमात्रेण ज्ञानस्य सदृशात्मन:।
भाव्यं तेनात्मना येन प्रतिकर्म विभज्यते।।302।।
अनात्मभूतो भेदोऽस्य विद्यमानोऽपि हेतुषु।
भिन्ने कर्मण्यभिन्नस्य न भेदेन नियामक:।।303।।
तस्माद् यतोऽस्यात्मभेदादस्याधिगतिरित्ययम्।
क्रियाया: कर्मनियम: सिद्धा सा तत्प्रसाधना।।304।।

अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम्।
अन्य: स्वभेदाज्ज्ञानस्य भेदकोऽपि कथञ्चन।।305।।
तस्मात् प्रमेयाधिगते: साधनं मेयरूपता।
साधनेऽन्यत्र तत्कार्यसम्बन्धो न प्रसिध्यति।।306।।
सा च तस्यात्मभूतेव तेन नार्थान्तरं फलम्।
दधानं तच्च तामात्मन्र्थाधिगमनात्मना।।307।।
सव्यापारमिवाभाति व्यापारेण स्वकर्मणि।
तद्वशात् तद्व्यवस्थानादकारकमपि स्वयम्।।308।।
यथा फलस्य हेतूनां सदृशात्मतयोद्भवात्।
हेतुरूपग्रहो लोकेऽक्रियावत्त्वेऽपि कथ्यते।।309।।
आलोचनाक्षसम्बन्धविशेषणधियामत:।
नेष्टं प्रामाण्यमेतेषां व्यवधानात् क्रियां प्रति।।310।।
सर्वेषामुपयोगेऽपि कारकाणां क्रियां प्रति।
यदन्त्यं भेदकं तस्यास्तत् साधकतमं मतम्।।311।।
सर्वसामान्यहेतुत्वादक्षाणामस्ति नेदृशम्।
तद्भेदेऽपि ह्यतद्रूपस्यास्येदमिति तत् कुत:!।।312।।
एतेन शेषं व्याख्यातं विशेषणधियां पुन:।
अताद्रूप्ये न भेदोऽपि तद्वदन्यधियोऽपि वा।।313।।
नेष्टो विषयभेदोऽपि क्रियासाधनयोर्द्वयो:।
एकार्थत्वे द्वयं व्यर्थं न च स्यात् क्रमभाविता।।314।।
साध्यसाधनताभाव: सकृद्भावे; धियोंऽशयो:।
तद्व्यवस्थाश्रयत्वेन साध्यसाधनसंस्थिति:।।315।।
सर्वात्मनापि सम्बद्धं कैश्चिदेवावगम्यते।
धर्मै: स नियमो न स्यात् सम्बन्धस्याविशेषत:।।316।।
तदभेदेऽपि भेदोऽयं यस्मात् तस्य प्रमाणता।
संस्काराच्चेदताद्रूप्ये न तस्याप्यव्यवस्थिते:।।317।।
क्रियाकारणयोरैक्यविरोध इति चेद्, असत्।
धर्मभेदाभ्युपगमाद्; वस्त्वभिन्नमितीष्यते।।318।।
एवम्प्रकारा सर्वैव क्रियाकारकसंस्थिति:।
भावस्य भिन्नाभिमतेष्वप्यारोपेण वृत्तित:।।319।।

{विज्ञप्तिमात्रताविचार:}

{अर्थसंवेदनम्}

काऽर्थसंविद् ? यदेवेदं प्रत्यक्षं प्रतिवेदनम्।
तदर्थवेदनं केन ताद्रूप्याद् व्यभिचारि तत्।।320।।
अथ सोऽनुभव: क्वास्य ? तदेवेदं विचार्यते।
सरूपयन्ति तत् केन स्थूलाभासं च तेऽणव:।।321।।
तन्नार्थरूपता तस्य सत्यार्थाव्यभिचारिणी।
तत्सवंदेनभावस्य न समर्था प्रसाधने।।322।।
तत्सारूप्यतदुत्पत्ती यदि संवेद्यलक्षणम्।
संवेद्यं स्यात् समानार्थं विज्ञानं समनन्तरम्।।323।।
'इदं दृष्टं श्रुतं वेदम्' इति यत्रावसायधी:।
न तस्यानुभव: सैव प्रत्यासत्तिर्विचार्यते।।324।।
दृश्यदर्शनयोर्येन तस्य तद् दर्शनं मतम्।
तयो: सम्बन्धमाश्रित्य द्रष्टुरेष विनिश्चय:।।325।।
आत्मा स तस्यानुभव: स च नान्यस्य कस्यचित्।
प्रत्यक्षप्रतिवेद्यत्वमपि तस्य तदात्मता।।326।।
नान्योऽनुभाव्यस्तेनास्ति तस्य नानुभवोऽपर:।
तस्यापि तुल्यचोद्यत्वात् स्वयं सैव प्रकाशते।।327।।
नीलादिरूपस्तस्यासौ स्वभावोऽनुभवश्च स:।
नीलाद्यनुभवात् ख्यात: स्वरूपानुभवोऽपि सन्।।328।।
प्रकाशमानस्तादात्म्यात् स्वरूपस्य प्रकाशक:।
यथा प्रकाशोऽभिमतस्तथा धीरात्मवेदिनी।।329।।
तस्याश्चार्थान्तरे वेद्ये दुर्घटौ वेद्यवेदकौ।
अवेद्यवेदकाकारा; यथा भ्रान्तैर्निरीक्ष्यते।।330।।
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा।
तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत्।।331।।
यदा तदा न सच्चोद्यग्राह्यग्राहकलक्षणा।
तदान्यसंविदोऽभावात् स्वसंवित् फलमिष्यते।।332।।
यदि बाह्योऽनुभूयेत को दोषो नैव कश्चन।
इदमेव किमुक्तं स्यात् स बाह्योऽर्थोऽनुभूयते।।333।।
यदि बुद्धिस्तदाकारा साऽस्त्याकारविशेषिणी।
सा बाह्यादन्यतो वेति विचारमिदमर्हति।।334।।
दर्शनोपाधिरहितस्याग्रहात् तद्ग्रहे ग्रहाद्।
दर्शनं नीलनिर्भासम्; नार्थो बाह्योऽस्ति केवलम्।।335।।

कस्यचित् किच्चिदेवान्तर्वासनाया: प्रबोधकम्।
ततो धियां विनियमो न बाह्यार्थव्यपेक्षया।।336।।
तस्माद् द्विरूपमस्त्येकं यदेवमनुभूयते।
स्मर्यते चोभयाकारस्यास्य संवेदनं फलम्।।337।।
यदा निष्पन्नतद्भाव इष्टोऽनिष्टोऽपि वा पर:।
विज्ञप्तिहेतुर्विषयस्तस्याश्चानुभवस्तथा।।338।।
यदा सविषयं ज्ञानं ज्ञानांशेऽर्थव्यवस्थिते:।
तदा य आत्मानुभव: स एवार्थविनिश्चय:।।339।।
यदीष्टाकार आत्मा स्यादन्यथा वानुभूयते।
इष्टोऽनिष्टोऽपि वा तेन भवत्यर्थ: प्रवेदित:।।340।।
विद्यमानेऽपि बाह्येऽर्थे यथानुभवमेव स:।
निश्चितात्मा स्वरूपेण नानेकात्मत्वदोषत:।।341।।
यदि बाह्यं न विद्येत कस्य संवेदनं भवेत्।
यद्यगत्या स्वरूपस्य बाह्यस्यैव न किं मतम्।।342।।
अभ्युपायेऽपि भेदेन न स्यादनुभवो द्वयो:।
अदृष्टावरणात् स्यात् चेन्न नामार्थवशा गति:।।343।।
तमनेकात्मकं भावमेकात्मत्वेन दर्शयत्।
तददृष्टं कथं नाम भवेदर्थस्य दर्शकम्।।344।।
इष्टानिष्टावभासिन्य: कल्पना नाक्षधीर्यदिं।
अनिष्टादावसन्धानं दृष्टं तत्रापि चेतसाम्।।345।।
तस्मात् प्रमेये बाह्येऽपि युक्तं स्वानुभव: फलम्।
यत: स्वभावोऽस्य यथा तथैवार्थविनिश्चय:।।346।।
तदर्थाभासतैवास्य प्रमाणं न तु सन्नपि।
ग्राहकात्माऽपरार्थत्वाद् ब्राह्येष्वर्थेष्वपेक्षते।।347।।
यस्माद् यथा निविष्टोऽसावर्थात्मा प्रत्यये तथा।
निश्चीयते निविष्टोऽसावेवमित्यात्मसंविद:।।348।।
इत्यर्थसंवित् सैवेष्टा यतोऽर्थात्मा न दृश्यते।
तस्माद् बुद्धिनिवेश्यार्थ: साधनं तस्य सा क्रिया।।349।।
यथा निविशते सोऽर्थो यत: सा प्रथते तथा।
अर्थस्थितेस्तदात्मत्वात् स्वविदप्यर्थविन्मता।।350।।
तस्माद् विषयभेदोऽपि न; स्वसंवेदनं फलम्।
उक्तं स्वभावचिन्तायां तादात्म्यादर्थसंविद:।।351।।

तथावभासमानस्य तादृशोऽन्यादृशोऽपि वा।
ज्ञानस्य हेतुरर्थोऽपीत्यर्थस्येष्टा प्रमेयता।।352।।
यथाकथञ्चित् तस्यार्थरूपं मुक्त्वावभासिन:।
अर्थग्रह: कथम् ? सत्यं न जानेऽहमपीदृशम्।।353।।
अविभागोऽपि बुद्ध्यात्मविपर्यासितदर्शनै:।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते।।354।।
मन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादय:।
अन्यथैवावभासन्ते तद्रूपरहिता अपि।।355।।
तथैव दर्शनात् तेषामनुपप्लुतचक्षुषा*।
दूरे यथा वा मरुषु महानल्पोऽपि दृश्यते।।356।। (पा0टि0- *0मनुपप्लुतचक्षुषाम्-रा0)
यथानुदर्शनं चेयं मेयमानफलस्थिति:।
क्रियतेऽविद्यमानापि ग्राह्यग्राहकसंविदाम्।।357।।
अन्यथैकस्य भावस्य नानारूपावभासिन:।
सत्यं कथं स्युराकारास्तदेकत्वस्य हानित:।।358।।
अन्यस्यान्यत्वहानेश्च; नाभेदो रूपदर्शनात्।
रूपाभेदं* च* पश्यन्ती धीरभेदं व्यवस्यति।।359।। (पा0टि0-**रूपाभेदेऽपि-रा0)
भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वत:।
यस्मादेकमनेकं च रूपं तेषां न विद्यते।।360।।
साधर्म्यदर्शनाल्लोके भ्रान्तिर्नामोपजायते।
अतदात्मनि तादात्म्यव्यवसायेन नेह तत्।।361।।
अदर्शनाज्जगत्यस्मिन्नेकस्यापि तदात्मन:।
अस्तीयमपि या त्वन्तरुपप्लवसमुद्भवा।।362।।
दोषोद्भवा प्रकृत्या सा वितथप्रतिभासिनी।
अनपेक्षितसाधर्म्यदृगादिस्तैमिरादिवत्।।363।।
तत्र बुद्धे: परिच्छेदो ग्राहकाकारसम्मत:।
तादात्म्यादात्मवित् तस्य स तस्य साधनं तत:।।364।।
तत्रात्मविषये माने यथारागादि वेदनम्।
इयं सर्वत्र संयोज्या मानमेयफलस्थिति:।।365।।
तत्राप्यनुभवात्मत्वात् ते योग्या स्वात्मसंविदि।
इति सा योग्यता मानमात्मा मेय: फलं स्ववित्।।366।।
ग्राहकाकारसंख्याता परिच्छेदात्मतात्मनि।
सा योग्यतेति च प्रोक्तं प्रमाणं स्वात्मवेदनम्।।367।।

सर्वमेह हि* विज्ञानं विषयेभ्य: समुद्भवद्।
तदन्यस्यापि** हेतुत्वे कथञ्चिद् विषयाकृति।।368।। (पा0टि0- *तु-पाठा0। **तदर्थस्यापि-पाठा0)
यथैवाहारकालादेर्हेतुत्वेऽपत्यजन्मनि।
पित्रोस्तदेकस्याकारं धत्ते नान्यस्य कस्यचित्।।369।।
तद्धेतुत्वेन तुल्येऽपि तदन्यैर्विषये मतम्।
विषयत्वं तदंशेन तदभावे न तद् भवेत्।।370।।
अनर्थाकारशङ्का स्यादप्यर्थवति चेतसि।
अतीतार्थग्रहे सिद्धे द्विरूपत्वात्मवेदने।।371।।
नीलाद्याभासभेदित्वान्नार्थो जातितद्वती।
सा चानित्या* न जाति: स्यान्नित्या वा जनिका कथम्।।372।। (पा0टि0-*वा नित्या–रा0।)
नामादिकं निषिद्धं प्राङ् नायमर्थवतां क्रम:।
इच्छामात्रानुरोधित्वादर्थशक्तिर्न सिध्यति।।373।।

{स्मृतिविचार:}

स्मृतिश्चेदृग्विधं ज्ञानं तस्याश्चानुभवाद् भव:।
स चार्थाकाररहित: सेदानीं तद्वती कथम्!।।374।।
नार्थाद् भावस्तदाभावात् स्यात्तथानुभवेऽपि स:।
आकार: स च नार्थस्य स्पष्टाकारविवेकत:।।375।।
व्यतिरिक्तं तदाकारं प्रतीयादपरस्तदा।
नित्यमात्मनि सम्बन्धे प्रतीयात् कथितं च न।।376।।
एकैकेनाभिसम्बन्धे प्रतिसन्धिर्न युज्यते।
एकार्थाभिनिवेशात्मा प्रवक्तृश्रोतृचेतसो:।।377।।
तदेकव्यवहारश्चेत् सादृश्यादतदाभयो:।
भिन्नात्मार्थ: कथं ग्राह्यस्तदा स्याद्धीरनर्थिका।।378।।
तच्चानुभवविज्ञानेनोभयांशावलम्बिना।
एकाकारविशेषेण तज्ज्ञानेनानुबध्यते।।379।।
अन्यथा ह्यतथारूपं* कथं ज्ञानेऽधिरोहति। (*ह्यतथाकारं–पाठा0।
एकाकारोत्तरं ज्ञानं तथा ह्युत्तरमुत्तरम्।।380।।
तस्यार्थरूपेणाकारावात्माकारश्च कश्चन।
द्वितीयस्य तृतीयेन ज्ञानेन हि विविच्यते।।381।।
अर्थकार्यतया ज्ञानस्मृतावर्थस्मृतेर्यदि।
भ्रान्त्या सङ्कलनम्; ज्योतिर्मनस्कारे च सा भवेत्।।382।।
सर्वेषामपि कार्याणां कारणै: स्यात् तथा ग्रह:।

कुलालादिविवेकेन न स्मर्येत घटस्ततः।।383।।
यस्मादतिशयाज् ज्ञानमर्थसंसर्गभाजनम्।
सारूप्यात्तत् किमन्यत् स्याद् दृष्टेश्च यमलादिषु।।384।।
आद्यानुभयरूपत्वे ह्येकरूपे* व्यवस्थितम्।
द्वितीयं व्यतिरिच्येत न परामर्शचेतसा।।385।।
अर्थसंकलनाश्लेषां धीर्द्वितीयावलम्बते। (पा0टि0-*अर्थसंकलनाश्लेषा–रा0)
नीलादिरूपेण धियं भासमानां पुरस्ततः।।386।।
अन्यथा ह्याद्यमेवैकं संयोज्येतार्थसम्भवात्।
ज्ञानं नादृष्टसम्बन्धं पूर्वार्थेनोत्तरोत्तरम्।।387।।
सकृत् संवेद्यमानस्य नियमेन धिया सह।
विषयस्य ततोऽन्यत्वं केनाकारेण सिध्यति।।388।।
भेदश्च भ्रान्तविज्ञानैर्दृश्येतेन्दाविवाद्वये।
संवित्तिनियमो नास्ति भिन्नयोर्नीलपीतयोः।।389।।
नार्थोऽसंवेदनः कश्चिदनर्थं वापि वेदनम्।
दृष्टं संवेद्यमानं तत् तयोर्नास्ति विवेकिता।।390।।
तस्मादर्थस्य दुर्वारं ज्ञानकालावभासिनः।
ज्ञानादव्यतिरेकित्वम्; हेतुभेदानुमा भवेत्।।391।।
अभावादक्षबुद्धीनां सत्स्वप्यन्येषु हेतुषु।
नियमं यदि न ब्रूयाद् प्रत्ययात् समनन्तरात्।।392।।
बीजादंकुरजन्माग्नेर्धूमात् सिद्धिरितीदृशी।
बाह्यार्थाश्रयिणी यापि कारणज्ञापकस्थितिः।।393।।
सापि तद्रूपनिर्भासा तथा नियतसङ्गमाः।
बुद्धीराश्रित्य कल्प्येत यदि किं वा विरुध्यते।।394।।
अनग्निजन्यो धूमः स्यात् तत्कार्यात् कारणेऽगतिः।
न स्यात् कारणतायां वा कुत एकान्ततो गतिः।।395।।
तत्रापि धूमाभासा धीः प्रबोधपटुवासनाम्।
गमयेदग्निनिर्भासां धियमेव न पावकम्।।396।।
तद्योग्यवासनागर्भ एव धूमावभासिनीम्।
व्यनक्ति चित्तसन्तानो धियं धूमोऽग्नितस्ततः।।397।।

{ज्ञानस्य द्वैरूप्यसाधनम्}

अस्त्येष विदुषां वादो बाह्यं त्वाश्रित्य वर्ण्यते।
द्वैरूप्यं सहसंवित्तिनियमात् तञ्च सिध्यति।।398।।

ज्ञानमिन्द्रियभेदेन पटुमन्दाविलादिकाम्।
प्रतिभासभिदामर्थे बिभ्रदेकत्र दृश्यते।399।।
अर्थस्याभिन्नरूपत्वादेकरूपं भवेन्मन:।
सर्वं तदर्थमर्थाच्चेत् तस्य नास्ति तदाभता।।400।।
अर्थाश्रयेणोद्भवस्तद्रूपमनकुर्वत:।
तस्य केनचिदंशेन परतोऽपि भिदा भवेत्।।401।।
तथा हयाश्रित्य पितरं तद्रूपोऽपि* सुत: पितु:।
भेदं केनचिदंशेन कुतश्चिदवलम्बते।।402।। (पा0टि0-*तद्रूपो हि–रा0)
मयूरचन्द्रकाकारं नीललोहितभास्वरम्।
सम्पश्यन्ति प्रदीपादेर्मण्डलं मन्दचक्षुष:।।403।।
तस्य तद्बाह्यरूपत्वे का प्रसन्नेक्षणेऽक्षमा।
भूतं पश्यँश्च तद्दर्शी कथं चोपहतेन्द्रिय:।।404।।
शोधितं तिमिरेणास्यर व्यक्तं चक्षुरतीन्द्रियम्।
पश्यतोऽन्याक्षदृश्येऽर्थे तदव्यक्तं कथं पुन:।।405।।
आलोकाक्षमनस्कारादन्यस्यैकस्य गम्यते।
शक्तिर्हेतुस्ततो नान्योऽहेतुश्च विषय: कथम्!।।406।।
स एव यदि धीहेतु: किं प्रदीपमपेक्षते।
दीपमात्रेण धीभावादुभयं नापि कारणम्।।407।।
दूरासन्नादिभेदेन व्यक्ताव्यक्तं न युज्यते।
तत् स्यादालोकभेदाच्चेत् तत्पिधानापिधानयो:।।408।।
तुल्या दृष्टिरदृष्टिर्वा सूक्ष्मोंऽशस्तस्य कश्चन।
आलोकेन च मन्देन दृश्यतेऽतो भिदा यदि।।409।।
एकत्वेऽर्थस्य बाह्यस्य दृश्यादृश्यभिदा कुत:।
अनेकत्वेऽणुशो भिन्ने् दृश्यादृश्यभिदा कुत:।।।410।।
मान्द्यपाटवभेदेन भासो बुद्धिभिदा यदि।
भिन्नेऽन्यस्मिन्नभिन्नस्य कुतो भेदेन भासनम्।।411।।
मन्दं तदपि तेज: किमावृतेरिह सा न किम्।
तनुत्वं तेजसोऽप्येतदस्त्यन्यत्राप्यतानवम्।।412।।
अत्यासन्ने च सुव्यक्तं तेजस्तत् स्यादतिस्फुटम्।
तत्राप्यदृष्टमाश्रित्य भवेद् रूपान्तरं यदि ? ।।413।।
अन्योन्यावरणात् तेषां स्यात् तेजोविहतिस्तत:।
तत्रैकमेव दृश्येत तस्यानावरणे सकृत्।।414।।

पश्येत् स्फुटास्फुटं रूपमेकोऽदृष्टेन वारणे।
अर्थानथौ न येन स्तस्तददृष्टं करोति किम्।।415।।
तस्मात् संविद् यथाहेतु जायमानार्थसंश्रयात्।
प्रतिभासभिदां धत्ते, शेषा: कुमतिदुर्नया:।।416।।
ज्ञानशब्दप्रदीपानां प्रत्यक्षस्येतरस्य वा।
जनकत्वेन पूर्वेषां क्षणिकानां विनाशत:।।417।।
व्यक्ति: कुतोऽसतां ज्ञानाद्; अन्यस्यानुपकारिण:।
व्यक्तौ व्यज्येत सर्वोऽर्थस्तद्धेतोर्नियमो यदि।।418।।
नैषापि कल्पना ज्ञाने ज्ञानं त्वर्थावभासत:।
तं व्यनक्तीति कथ्येत तदभावेऽपि तत्कृतम्।।419।।
नाकारयति चान्योऽर्थोऽनुपकारात् सहोदित:।
*व्यक्तोऽनाकारयन् ज्ञानं स्वाकारेण कथं भवेत् ! ।।420।। (*नाकारयज्ज्ञानं–रा0)

{अक्षणिकव्यक्तेरसम्भवत्वम्}

वज्रोपलादिरप्यर्थ: स्थिर: सोऽन्यानपेक्षणात्।
सकृत् सर्वस्य* जनयेज्ज्ञानानि जगत: समम्।1421।। (*स्वयम्–पाठा0)
क्रमाद् भवन्ति तान्यस्य सहकार्युपकार्यत:।
आहु: प्रतिक्षणं भेदं स दोषोऽत्रापि पूर्ववत्।।422।।

{स्वसंवेदनविचार:}

संवेदनस्य तादात्म्ये न विवादोऽस्ति कस्यचित्।
तस्यार्थरूपताऽसिद्धा सापि सिध्यति संस्मृते:।।423।।
भेदेनाननुभूतेऽस्मिन्नविभक्ते स्वगोचरै:।
एवमेतन्न खल्वेवमिति सा स्यान्न भेदिनी।।424।।
न चानुभवमात्रेण कश्चित् भेदौ विवेचक:।
विवेकिनी न चास्पष्टभेदे धीर्यमलादिवत्।।425।।
द्वैरूप्यसाधनेमापि प्राय: सिद्धं स्ववेदनम्।
स्वरूपभूताभासस्य तदा संवेदनेक्षणात्।।426।।
धियाऽतद्रूपया ज्ञाने निरुद्धेऽनुभव: *कथम्। (पा0टि0-*कुत:–पाठा0)
स्वं च रूपं न सा *वेत्तीत्युत्सन्नोऽनुभवोऽखिल:।।427।। (पा0टि0-*0ऽर्थिन:–पाठा0)
बर्हिमुखं च तज्ज्ञानं भात्यर्थप्रतिभासवत्।
बुद्धेश्च ग्राहिका वित्तिर्नित्यमन्तर्मुखात्मनि।।428।।
यो यस्य विषयाभासस्तं वेत्ति न तदित्यपि।
प्राप्ता का संविदन्यास्ति ताद्रूप्यादिति चेन्मतम्।।429।।

प्राप्तं संवेदनं सर्वसदृशानां परस्परम्।
बुद्धि: सरूपा तद्विच्चेत् नेदानीं वित् सरूपिका।।430।।
स्वयं सोऽनुभवस्तस्या न स सारूप्यकारण:।
क्रियाकर्मव्यवस्थायास्तल्लोके स्यान्निबन्धनम्।।431।।
स्वभावभूततद्रूपसंविदारोपविप्लवात्।
नीलादेरनुभूताख्या नानुभूते: परात्मन:।।432।।
धियो नीलादिरूपत्वे बाह्योऽर्थ: किम्प्रमाणक:।
धियोऽनीलादिरूपत्वे स तस्यानुभव: कथम्!।।433।।
यदा संवेदनात्मत्वं न सारूप्यनिबन्धनम्।
सिद्धं तत् स्वत एवास्य किमर्थेनोपनीयते!।।434।।
न च *सर्वात्मना साम्यमज्ञानत्वप्रसङ्गत:।
न च केनचिदंशेन सर्वं सर्वस्य वेदनम्।।435।।
(*पा0टि0-"सर्वात्मना हि सारूप्ये ज्ञानमज्ञानतां व्रजेत। साम्ये केनचिदंशेन स्यात् सर्वे सर्ववेदनम्।।" –पाठा0।)
यथा नीलादिरूपत्वान्नीलाद्यनुभवो मत:।
तथानुभवरूपत्वात् तस्याप्यनुभवो भवेत्।।436।।
नानुभूतोऽनुभव इत्यर्थवद्धि विनिश्चय:।
तस्माददोष इति चेत् नार्थेऽप्यस्त्येष सर्वदा।।437।।
कस्माद् वानुभवे नास्ति सति सत्तानिबन्धने।
अपि चेदं यदाभाति दृश्यमाने सितादिके।।438।।
पुंस: सिताद्यभिव्यक्तिरूपंसंवेदनं स्फुटम्।
तत् किं सिताद्यभिव्यक्ते: पररूपमथात्मन:।।439।।
पररूपेऽप्रकाशायां व्यक्तौ व्यक्तं कथं सितम्।
ज्ञानं व्यक्तिर्न सा व्यक्तेत्यव्यक्तमखिलं जगत्।।440।।
व्यक्तेर्व्यक्त्यन्तरव्यक्तावपि दोषप्रसङ्गत:।
दृष्ट्या वाज्ञातसम्बन्धं विशिनष्टि तया कथम्!।।441।।
यस्माद् द्वयोरेकगतौ न द्वितीयस्य दर्शनम्।
द्वयो: संसृष्टयोर्दृष्टौ स्याद् दृष्टमिति निश्चय:।।442।।
सरूपं दर्शनं यस्य दृश्यतेऽन्येन चेतसा।
दृष्टाख्या* तत्र चेत्; सिद्धं सारूप्येऽस्य स्ववेदनम्।।443।। (पा0टि0-*दृष्टाख्येति न–रा0)
अथात्मरूपं नो वेत्ति पररूपस्य चित् कथम्।
सारूप्याद् वेदनाख्या च प्रागेव प्रतिवर्णिता।।444।।

दृष्टयोरेव सारूप्यग्रहोऽर्थ च न दृष्टवान्।
प्राक् कथं दर्शनेनास्य सारूप्यं सोऽध्यवस्यति।।445।।
सारूप्यमपि नेच्छेद् यस्तस्य नोभयदर्शनम्।
तदार्थो ज्ञानमिति च ज्ञाते चेति गता कथा।।446।।
अथ स्वरूपम्, सा तर्हि स्वयमेव प्रकाशते।
यत् तस्यामप्रकाशायामर्थ: स्यादप्रकाशित:।।447।।
एतेनानात्मवित्पक्षे सर्वार्थादर्शनेन ये।
अप्रत्यक्षा धियं प्राहुस्तेऽपि निर्वर्णितोत्तरा:।।448।।
आश्रयालम्बनाभ्यासभेदाद् भिन्निप्रवृत्तय:।
सुखदु:खाभिलाषादिभेदा बुद्धय एव ता:।।449।।
प्रत्यक्षा:, तद्विविक्तं च नान्यत् किञ्चिद्विभाव्यते।
यत्तज्ज्ञानं परोऽप्येतान् भुञ्जीतान्येन विद् यदि।।450।।
तज्जा तत्प्रतिभासा वा यदि धीर्वेत्ति नापरा
आलम्बमानस्यान्यस्याप्यस्त्यवश्यमिदं द्वयम्।।451।।
अथ नोत्पद्यते तस्मान्न च तत्प्रतिभासिनी।
सा धीर्निर्विषया प्राप्ता; सामान्यं च तदग्रहे।।452।।
न गृह्यत इति प्रोक्तम्; न च तद्वस्तु किञ्चन।
तस्मादर्थावभासोऽसौ नान्यस्तस्या धियस्तत:।।453।।
सिद्धे प्रत्यक्षभावात्मविदौ; गृह्णाति तान्* पुन:। (*पा0टि0-तत्–रा0)
नाध्यक्षमिति चेदेष कुतो भेद: समार्थयो:।।454।।
अदृष्टैकार्थयोगादे: संविदो नियमो यदि।
सर्वथान्यो न गृह्णीयात् संविद्भेदोऽप्यपोदित:।।455।।
येषां च योगिनोऽन्यस्य प्रत्यक्षेण सुखादिकम्।
विदन्ति तुल्यानुभवास्तद्वत् तेऽपि स्युरातुरा:।।456।।
विषयेन्द्रियसम्पाताभावात् तेषां तदुद्भवम्।
नोदेति दु:खमिति चेत् ? न वै दु:खसमुद्भव:।।457।।
दुखस्य वेदनं किन्तु *दु:खज्ञानसमुद्भव:।
न हि दु:खाद्यसंवेद्यं पीडानुग्रहकारणम्।।458।। (*पा0टि0-दु:खासंवेदनं–पाठा0)
भासमानं स्वरूपेण पीडा दु:खं स्वयं यदा।
न तदालम्बनं ज्ञानं न तदैवं प्रयुज्यते*।।459।। (पा0टि0-*प्रसज्यते–पाठा0)
भिन्ने ज्ञानस्य सर्वस्य तेनालम्बनवेदने।
अर्थसारूप्यमालम्ब आत्मा वित्ति: स्वयं स्फुटा।।460।।

अपि चाध्यक्षताऽभावे धिय: स्याल्लिङ्गतो गति:।
तच्चाक्षमर्थो धी: पूर्वो मनस्कारोऽपि वा भवेत्।।461।।
कार्यकारणसामग्र्यामस्यां सम्बन्धि नापरम्*।
सामर्थ्यादर्शनात् तत्र नेन्द्रियं व्यभिचारत:।।462।।(*पा0टि0-नापराम्–रा0)
तथार्थो धीमनस्कारौ ज्ञानं तौ च न सिध्यत:।
नाप्रसिद्धस्य लिङ्गत्वं व्यक्तिरर्थस्य चेन्मता।।463।।
लिङ्गम्; सैव ननु ज्ञानं व्यक्तोऽर्थोऽनेन वर्णित:।
व्यक्तावननुभूतायां तद्व्यक्तत्वाविनिश्चयात्।।464।।
अथार्थस्यैव कश्चित् स विशेषो व्यक्तिरिष्यते।
नानुत्पादव्ययवतो विशेषोऽर्थस्य कश्चन।।465।।
तदिष्टौ वा प्रतिज्ञानं क्षणभङ्ग: प्रसज्यते।
स च जातोऽथ वाऽज्ञातो भवेज्ज्ञातस्य लिङ्गता।।466।।
यदि ज्ञानेऽपरिच्छिन्ने ज्ञातोऽसाविति तत् कुत:।
ज्ञातत्वेनापरिच्छिन्नमपि तद् गमकं कथम्।।467।।
अदृष्टदृष्टयोऽन्येन द्रष्ट्रा दृष्टा न हि क्वचित्।
विशेष: सोऽन्यदृष्टावप्यस्तीति स्यात् स्वधीगति:।।468।।
तस्मादनुमितिर्बुद्धे: स्वधर्मनिरपेक्षिण:।
केवलान्नार्थधर्मात् क: स्वधर्म: स्वधियो पर:।।469।।
प्रत्यक्षाधिगतो हेतु: तुल्यकारणजन्मन:।
तस्य भेद: कुतो बुद्धेर्व्यभिचार्यन्यजश्च स:।।470।।
रूपादीन् पञ्चविषयानिन्द्रियाण्युपलम्भनम्।
मुक्त्वा न कार्यमपरं तस्या: समुपलभ्यते।।471।।
तत्रात्यक्षं द्वयं पञ्चस्वर्थेष्वेकोऽपि नेक्ष्यते।
रूपदर्शनतो जातो योऽन्यथा व्यस्तसम्भव:।।472।।
यदेवमप्रतीतं तल्लिङ्गमित्यतिलौकिकम्।
विद्यमानेऽपि लिङ्गे तां तेन सार्धमपश्यत:।।473।।
कथं प्रतीतिर्लिङ्गं हि नादृष्टस्य प्रकाशकम्।
तत एवास्य लिङ्गात् प्राक् प्रसिद्धेरुपवर्णने।।474।।
दृष्टान्तान्तरसाध्यत्वं तस्यापीत्यनवस्थिति:।
इत्यर्थस्य धिय: सिद्धि: नार्थात् तस्या: कथञ्चन।।475।।
तदप्रसिद्धावर्थस्य स्वयमेवाप्रसिद्धित:।
प्रत्यक्षां च धियं दृष्ट्वा तस्याश्चेष्टाभिधादिकम्।।476।।

परचित्तानुमानं च न स्यादात्मन्यदर्शनात्।
सबन्धस्य, मनोबुद्धावर्थलिङ्गाप्रसिद्धित:।।477।।
प्रकाशिता कथं वा स्यात् बुद्धिर्बुद्ध्यन्तरेण व:।
अप्रकाशात्मनो: साम्याद् व्यङ्ग्यव्यञ्जकता कुत:।।478।।
विषयस्य कथं व्यक्ति: ? प्रकाशे रूपसंक्रमात्।
स च प्रकाशस्तद्रूप: स्वयमेव प्रकाशते।।479।।
तथाम्युपगमे बुद्धेर्बुद्धौ बुद्धि: स्ववेदिका।
सिद्धान्यथा तुल्यधर्मा विषयोऽपि धिया सह।।480।।
इति प्रकाशरूपा न: स्वयं धी: सम्प्रकाशते।
अन्योऽस्यां रूपसंक्रान्त्या प्रकाश: सन् प्रकाशते।।481।।
सादृश्येऽपि हि धीरन्या प्रकाश्या न तया मता।
स्वयं प्रकाशमानाऽर्थस्तद्रूपेण* प्रकाशते।।482।। (पा0टि0-*प्रकाशनाद्–पाठा0)
यथा प्रदीपयोर्दीपघटयोश्च तदाश्रय:।
व्यंग्यव्यञ्जकभेदेन व्यवहार: प्रतन्यते।।483।।
विषयेन्द्रियमात्रेण न दृष्टमिति निश्चय:।
तस्माद् यतोऽयं तस्यापि वाच्यमन्यस्य दर्शनम्।।484।।

{स्वसंवित्तिसिद्धि:}

स्मृतेरप्यात्मवित् सिद्धा ज्ञानस्या; ऽन्येन वेदने।
दीर्घादिग्रहणं न स्याद् बहुमात्रानवस्थिते:।।485।।
अवस्थितावक्रमायां सकृदाभासनान्मतौ।
वर्ण: स्यादक्रमोऽदीर्घ:; क्रमवानक्रमां कथम्।।486।।
उपकुर्यादसंश्लिष्यन् वर्णभाग: परस्परम्।
आन्त्यं पूर्वस्थितादूर्ध्व वर्धमानो ध्वनिर्भवेत्।। 487।।
अक्रमेण ग्रहादन्ते क्रमवद्धीश्च नो भवेत्।
धिय: स्वयं च न स्थानं तदूर्ध्वविषयास्थिते:।।488।।
स्थाने स्वयं न नश्येत् सा पश्चादप्यविशेषत:।
दोषोऽयं सकृदुत्पन्नाक्रमवर्णस्थितावपि।।489।।
सकृद्यत्नोद्भवाद् व्यर्थ: स्याद् यत्नश्चोत्तरोत्तर:।
व्यक्तावप्येष वर्णानां दोष: समनुषज्यते।।490।।
अनेकया तद्ग्रहणे यान्त्या धी: सानुभूयते।
न दीर्घग्राहिका सा च तन्न स्याद् दीर्घधीस्मृति:।।491।।
पृथक् पृथक् च बुद्धीनां संवित्तौ तद्ध्वनिश्रुते:*। (पा0टि-*तद्ध्वनि : श्रुतो: –रा0)

अविच्छिन्नाभता न स्याद् घटनं च निराकृतम्।।492।।
विच्छिन्नं श्रृण्वतोऽप्यस्य यद्यविच्छिन्नविभ्रम:।
ह्रस्वद्वयोच्चारणेऽपि स्यादविच्छिन्नविभ्रम:।।493।।
विच्छिन्ने दर्शने चाक्षादविच्छिन्नाधिरोपणम्।
नाक्षात्, सर्वाक्षबुद्धीनां वितथत्वप्रसङ्गत:।।494।।
सर्वान्त्योऽपि हि वर्णात्मा निमेषतुलितस्थिति:।
स च क्रमादनेकाणुसम्बन्धेन नितिष्ठति।।495।।
एकाण्वत्ययकालश्च कालोऽल्पीयान् क्षणो मत:।
बुद्धिश्च क्षणिका तस्मात् क्रमाद् वर्णान् प्रपद्यते।।496।।
इति वर्णेऽपि रूपादावविच्छिन्नावभासिनी।
विच्छिन्नाप्यन्यया बुद्धि: सर्वा स्याद् वितथार्थिका।।497।।
घटनं यच्च भावानामन्यत्रेन्द्रियविभ्रमात्।
भेदालक्षणविभ्रान्तं स्मरणं तद् विकल्पकम्।।498।।
तस्य स्पष्टावभासित्वं जल्पसंसर्गिण: कुत:।
नाक्षग्राह्येऽस्ति शब्दानां योजनेति विवेचितम्।।499।
विच्छिन्नं पश्यतोऽप्यक्षैर्घटयेद् यदि कल्पना।
अर्थस्य तत्संवित्तेश्च सततं भासमानयो:।।500।।
बाधकेऽसति सन्न्याये विच्छिन्न इति तत् कुत:।
बुद्धीनां शक्तिनियमादिति चेत् स कुतो मत:!।।501।।
युगपद् बुद्ध्यदृष्टेश्चेत् ? तदेवेदं विचार्यते।
तासां समानजातीये सामर्थ्यनियमो भवेत्।।502।।
तथा हि सम्यग् लक्ष्यन्ते विकल्पा: क्रमभाविन:।

{प्रत्यभिज्ञाविचार:}

एतेन य: समक्षेऽर्थे प्रत्यभिज्ञानकल्पनाम्।।503।।
स्पष्टावभासां प्रत्यक्षां कल्पयेत् सोऽपि वारित:।
केशगोलकदीपादावपि स्पष्टावभासनात्।।504।।
प्रतीतभेदेऽप्यध्यक्षा धी: कथं तादृशी भवेत्।
तस्मान्न प्रत्यभिज्ञानाद् वर्णाद्येकत्वनिश्चय:।।505।।
पूर्वानुभूतस्मरणात् तद्धर्मारोपणाद् विना।
स एवायमिति ज्ञानं नास्ति तच्चाक्षजे कुत:।।506।।
न चार्थज्ञानसंवित्योर्युगपत् सम्भवो यत:।
लक्ष्येते* प्रतिभासौ द्वौ नार्थार्थज्ञानयो: पृथक्।।507।। (पा0टि0-*लक्ष्यते–रा0)

न ह्यर्थाभासि च ज्ञानमर्थो बाह्यश्च केवल:।
एकाकारमतिग्राह्ये भेदाभावप्रसङ्गत:।।508।।
सूपलक्षेण भेदेन यौ संवित्तौ न लक्षितौ।
अर्थार्थप्रत्ययौ पश्चात् स्मर्येते तौ पृथक् कथम्।।509।।
क्रमेणानुभवोत्पादेऽप्यर्थार्थमनसोरयम्।
प्रतिभासस्य नानात्वचोद्यदोषो दुरुद्धर:।।510।।
अर्थसंवेदनं तावत् ततोऽर्थाभासवेदनम्।
न हि संवेदनं शुद्धं भवेदर्थस्य वेदनम्।।511।।
तथा हि नीलाद्याकार एक एकं च वेदनम्।
लक्ष्यते न तु नीलाभे वेदने वेदनं परम्।।512।।
ज्ञानान्तरेणानुभवो भवेत् तत्रापि हि* स्मृति:। (पा0टि0-*च–रा0)
दृष्टा; तद्वेदनं केन तस्याप्यन्येन चेद् ? इमाम्।।513।।
मालां ज्ञानविदां कोऽयं जनयत्यनुबन्धिनीम्।
पूर्वा धी: सैव चेन्न स्यात् सञ्चारो विषयान्तरे।। 514 ।।
तां ग्राह्यलक्षणप्राप्तामासन्नां जनिकां धियम्।
अगृहीत्वोत्तरं ज्ञानं गृह्णीयादपरं कथम्।।515।।
आत्मनि ज्ञानजनने स्वभावे नियतां च ताम्।
को नामान्या विबध्नीयाद् बहिरंगेऽन्तरङ्गिकाम्।।516।।
बाह्य: सन्निहितोऽप्यर्थस्तां विबध्नकन् हि न प्रभु:।
धियं नानुभवेत् कश्चिदन्यथार्थस्य सन्निधौ।।517।।
न चासन्निहितार्थास्ति दशा काचिदतो धिय:।
उत्खातमूला स्मृतिरप्युत्सन्नेत्युज्ज्वलं मतम्।।518।।
अतीतादिविकल्पानां येषां नार्थस्य सन्निधि:।
सञ्चारकरणाभावाद् उत्सीदेदर्थचिन्तनम्।।519।।
आत्मविज्ञानजनने शक्तिसंक्षयत: शनै:।
विषयान्तरसञ्चारो यदि ? सैवार्थधी: कुत: !।।520।।
शक्तिक्षये पूर्वधियो न हि धी: प्राग्धिया विना।
अन्यार्थाशक्तिविगुणे ज्ञाने ज्ञानोदयागते:।।521।।
सकृद्विजातीयजातावप्येकेन पटीयसा।
चित्तेनाहितवैगुण्यादालयान्नान्यसम्भव:।।522।।
नापेक्षेतान्यथा साम्यं मनोवृत्तेर्मनोऽन्तरम्।
मनोज्ञानक्रमोत्पत्तिरप्यपेक्षा प्रसाधनी।।523।।

एकत्वान्मनसोऽन्यस्मिन् सक्तस्यान्यागतेर्यदि।
ज्ञानान्तरस्यानुदयो न कदाचित् सहोदयात्।।524।।
समवृत्तौ च तुल्यत्वात् सर्वदान्यागतिर्भवेत्।
जन्म वात्ममनोयोगमात्रजानां* सकृद् भवेत्।।525।। (पा0टि0-*चात्थमनो0–रा0)
एकैव चेत् क्रियैक: स्यात् किं दीपोऽनेकदर्शन:।
क्रमेणापि न शक्तं स्यात् पश्चादप्यविशेषत:।।526।।
अनेन देहपुरुषावुक्तौ संस्कारतो यदि।
नियम: स कुत: पश्चात् बुद्धेश्चेदस्तु सम्मतम्।।527।।
न ग्राह्यतान्या जननाज्जननं ग्राह्यलक्षणम्।
अग्राह्यं न हि तेजोऽस्ति; न च सौक्ष्म्याद्यनंशके।।528।।
ग्राह्यताशक्तिहानि: स्यात् नान्यस्य जननात्मन:।
ग्राह्यताया न खल्वन्यज्जननं ग्राह्यलक्षणे।।529।।
साक्षान्न ह्यन्यथा बुद्धे रूपादिरुपकारक:।
ग्राह्यतालक्षणादन्यस्तद्भावनियमोऽस्य क:।।530।।
बुद्धेरपि तदस्तीति सापि सत्त्वे व्यवस्थिता।
ग्राह्योपादानसंवित्ती चेतसो ग्राह्यलक्षणम्।।531।।

{योगिनां ज्ञानम्}

रूपादेश्चेतसश्चैवमविशुद्धधियं प्रति।
ग्राह्यलक्षणचिन्तेयमचिन्त्या योगिनां गति:।।532।।
तत्र सूक्ष्मादिभावेन ग्राह्यमग्राह्यतां व्रजेत्।
रूपादि बुद्धे: किं जातं पश्चाद् यत् प्राङ् न विद्यते।।533।।
सति स्वधीग्रहे तस्माद् यैवानन्तरहेतुता*।
चेतसो ग्राह्यता सैव ततो नार्थान्तरे गति:।।534।।(पा0टि0- *सैवानन्तर0-रा0)
नानेकशक्त्यभवेऽपि भावो नानेककार्यकृत्।
प्रकृत्यैवेति गदितम्, नानेकस्मान्न चेद् भवेत्।।535।।

{हेतुसामग्र्या: सर्वसम्भवत्वम्}

न किञ्चिदेकमेकस्मात्. सामग्र्या: सर्वसम्भव:।
एकं स्यादपि सामग्र्योरित्युक्तं तदनेककृत्।।536।।
अर्थं पूर्वञ्च विज्ञानं गृह्णीयाद् यदि धी: परा।
अभिलापद्वयं नित्यं स्याद् दृष्टक्रममक्रमम्।।537।।
पूर्वापरार्थभासित्वाच्चिन्तादावेकचेतसि।
द्विर्द्विरेकं च भासेत भासनादात्मतद्धियो:।।538।।

{आत्मानुभूतं प्रत्यक्षम्}

विषयान्तरसञ्चारे यद्यन्त्यं नानुभूयते।
परानुभूतवत् सर्वाननुभूतिः प्रसज्यते।।539।।
आत्मानुभूतं प्रत्यक्षं नानुभूतं परैः यदि।
आत्मानुभूतिः सा सिद्धा कुतो येनैवमुच्यते।।540।।
व्यक्तिहेत्वप्रसिद्धिः स्यात् न व्यक्तेर्व्यक्तमिच्छतः।
व्यक्त्यसिद्धावपि व्यक्तं यदि व्यक्तमिदं जगत्।।541।।

स्वार्थानुमाननामा
तृतीय: परिच्छेद:

{हेतुविचार:}

{हेतुलक्षणम्}

पक्षधर्मस्तदंशेन व्याप्तो हेतु:;

{तत्त्रिरूपत्वम्}

त्रिधैव स:।

अविनाभावनियमात्;

{हेत्वाभासा:}

हेत्वाभासास्ततोऽपरे।।1।।

कार्यं स्वभावैर्यावद्भिरविनाभावि कारणे।

हेतु: स्वभावे भावोऽपि भावमात्रानुरोधिनि।।2।।

{अनुपलब्धिविचार:}

अप्रवृत्ति: प्रमाणानाम् अप्रवृत्तिफलाऽसति।

असज्ज्ञानफला, काचिद् हेतुभेदव्यपेक्षया।।3।।

विरुद्धकार्ययो: सिद्धिरसिद्धिर्हेतुभावयो:।

दृश्यात्मनोरभावार्थानुपलब्धिश्चतुर्विधा।।4।।

तद्विरुद्धनिमित्तस्य योपलब्धि: प्रयुज्यते।

निमित्तयोर्विरुद्धत्वाभावे* सा व्यभिचारिणी**।।5।।(पा0टि0- **भावो हि व्यभिचारवान्-रा0।)

इष्टं विरुद्धकार्येऽपि देशकालाद्यपेक्षणम्।

अन्यथा व्यभिचारि* स्यात् भस्मेवाशीतसाधने।।6।।(पा0टि0 - *व्यभिचारी-रा0।

हेतुना य: समग्रेण कार्योत्पादोऽनुमीयते।

अर्थान्तरानपेक्षत्वात् स स्वभावोऽनुवर्णित:।।7।।

सामग्रीफलशक्तीनां परिणामानुबन्धिनि।

अनैकान्तिकता कार्ये प्रतिबन्धस्य सम्भवात्।।8।।

एकसामग्र्यधीनस्य रूपादे रसतो गति:।

हेतुधर्मानुमानेन धूमेन्धनविकारवत्।।9।।

शक्तिप्रवृत्त्या न विना रस: सैवान्यकारणम्।

इत्यतीतैककालानां गतिस्तत्कार्यलिङ्गजा*।।10।।

हेतुना योऽसमग्रेण* कार्योत्पादोऽनुमीयते।

तच्छेषवदसामर्थ्याद् देहाद् रागानुमानवत्।।11।।

(पा0टि0-*जायते कार्यलिङ्गत:-रा0; त्वसग्रेण-क0।)
विपक्षेऽदृष्टिमात्रेण कार्यसामान्यदर्शनात्।
हेतुज्ञानं* प्रमाणाभं* वचनाद् रागितादिवत्।।12।। (पा0टि0-*हेतुज्ञानप्रमाणाभं-रा0।)
न चादर्शनमात्रेण विपक्षेऽव्यभिचारिता।
सम्भाव्यव्यभिचारित्वात्* स्थालीतण्डुलपाकवत्।।13।। (पा0टि0- *0व्यभिचारत्वात्-क0।

{शेषवदनुमाननिरासनम्}

यस्यादर्शनमात्रेण व्यतिरेक: प्रदर्श्यते।
तस्य संशयहेतुत्वाच्छेषवत् तदुदाहृतम्।।14।।
हेतोस्त्रिष्वपि रूपेषु निश्चयस्तेन वर्णित:।
असिद्धविपरीतार्थव्यभिचारिविपक्षत:।।15।।

{व्याप्तिविचार:}

व्यभिचारिविपक्षेण वैधर्म्यवचनं च यत्।
यद्यदृष्टिफलं तच्च तदनुक्तेऽपि गम्यते।।16।।
न च नास्तीति वचनात् तन्नास्त्येव यथा यदि।
नास्ति स ख्याप्यते न्यायस्तदा* नास्तीति गम्यते**।।17।।
(पा0टि0-*चायमुक्तौ नेति गतिस्तदा-रा0 ** तद्व्यर्थमिति शेष:)
यद्यदृष्टौ निवृत्ति:* स्याच्छेषवद् व्यभिचारि किम्।
व्यतिरेक्यपि हेतु: स्यान्न वाच्याऽसिद्धियोजना।।18।।(पा0टि0-*यद्यदृष्ट्या-क0)
विशेषस्य व्यवच्छेदहेतुता स्याददर्शनात्।
प्रमाणान्तरबाधा चेन्नेदानीं नास्तिताऽदृश:।।19।।
तथान्यत्रापि सम्भाव्यं प्रमाणान्तरबाधनम्।
दृष्टाऽयुक्तिरदृष्टेश्च स्यात् स्पर्शस्याविरोधिनी।।20।।
देशादिभेदाद् दृश्यन्ते भिन्ना द्रव्येषु शक्तय:।
तत्रैकदृष्ट्या नान्यत्र युक्तस्तद्भावनिश्चय:।।21।।
आत्ममृच्चेतनादीनां योऽभावस्याप्रसाधक:।
स एवानुपलम्भ: किं हेत्वभावस्य साधक:।।22।।
तस्मात् तन्मात्रसम्बद्ध:* स्वभावो भावमेव वा।
निवर्तयेत्, कारणं वा कार्यमव्यभिचारत:।।23।। (पा0टि0 - *0सम्बन्ध:-रा0)
अन्यथैकनिवृत्त्यान्यविनिवृत्ति: कथं भवेत्।
नाश्ववानिति मर्त्येन* न भाव्यं गोमतापि किम्।।24।।(पा0टि0-*सन्देहे किं न वा पशुसंशय:रा0)
सन्निधानात् तथैकस्य कथमन्यस्य सन्निधि:।
गोमानित्येव मर्त्येन भाव्यमश्ववतापि किम्।।25।।

तस्माद् वैधर्म्यदृष्टान्ते नेष्टोऽवश्यमिहाश्रय:।
तदभावे च तन्नेति वचनादपि तद्गति: ∗।।26।। (पा0टि0- ∗तद्गते:-क0।)
तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिन:।
ख्याप्येते, विदुषां वाच्यो हेतुरेव हि केवल:।।27।।
तेनैव ज्ञातसम्बन्धे द्वयोरन्यतरोक्तित:।
अर्थापत्त्या द्वितीयेऽपि स्मृति: समुपजायते।।28।।
हेतुस्वभावाभावोऽत: प्रतिषेधे च कस्यचित्।
हेतु:, युक्तोपलम्भस्य तस्य चानुपलम्भनम्।।29।।
इतीयं त्रिविधोक्ताप्यनुपलब्धिरनेकधा∗।
तत्तद्विरुद्धाद्यगतिगतिभेदप्रयोगत:।।30।। (पा0टि0- ∗त्रिविधाप्युक्तानु0-क0।)
कार्यकारणभावाद् वा स्वभावाद् वा नियामकात्।
अविनाभावनियमोऽदर्शनान्न न दर्शनात्।।31।।
अवश्यंभावनियम:∗ क: परस्यान्यथा∗ परै:। (पा0 टि0- ∗0नियमोऽन्यथा परस्य क:-रा0।)
अर्थान्तरनिमित्ते वा धर्मे वाससि रागवत्।।32।।
अर्थान्तरनिमित्तो हि धर्म: स्यादन्य एव स:।
पश्चाद् भावान्न हेतुत्वं फलेऽप्येकान्तता कुत:।।33।।
कार्यं धूमो हुतभुज: कार्यधर्मानुवृत्तित:।
तस्याभावे∗ तु स भवन्∗ हेतुमत्तां विलङ्घयेत्।।34।। (पा0टि0-∗ स भवस्तदभावेपि-क0।)
नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात्।
अपेक्षातश्च∗ भावानां कादाचित्कस्य सम्भव:।।35।। (पा0टि0-∗अपेक्षया हि-क0।)
अग्निस्वभाव: शक्रस्य मूर्धा यद्यग्निरेव स:।
अथानग्निस्वभावोऽसौ धूमस्तत्र कथं भवेत्!।।36।।
धूमहेतुस्वभावो हि वह्निस्तच्छक्तिभेदवान्।
अधूमहेतोर्धूमस्य भावे स स्यादहेतुक:।।37।।
अन्वयव्यतिरेकाद् यो यस्य दृष्टोऽनुवर्तक:।
स्वभावस्तस्य तद्धेतुरतो भिन्नान्न सम्भव:।।38।।

{सामान्यविचार:}

स्वभावेऽप्यविनाभावो भावामात्रानुरोधिनि।
तदभावे स्वयम्भावस्याभाव: स्यादभेदत:।।39।।
सर्वे भावा: स्वभावेन स्वस्वभावव्यवस्थिते:।
स्वभावपरभावाभ्यां यस्माद्∗ व्यावृत्तिभागिन:∗∗।।40।। (पा0टि0-∗ ∗∗व्यवृत्तिभागिनो यत:रा0।)

तस्माद् यतो* यतोऽर्थानां व्यावृत्तिस्तन्निबन्धना:**।
जातिभेदा: प्रकल्प्यन्ते तद्विशेषावगाहिन:।।41।।
(पा0टि0-* **तस्माद् व्यावृत्तिरर्थानां यतश्च तन्निबन्धना:-रा0।
तस्माद् विशेषो* यो येन धर्मेण** सम्प्रतीयते।
न स शक्यस्ततोऽन्येन तेन भिन्ना व्यवस्थिति:।।42।।
(पा0टि0- * **यो येन धर्मेण विशेष: पाठा0।)
एकस्यार्थस्वभावस्य प्रत्यक्षस्य सत: स्वयम्।
कोऽन्यो भागो* न दृष्ट:** स्याद् य: प्रमाणै: परीक्ष्यते।।43।।
(पा0टि0-* **न दृष्टो भागा:-पाठा0।)
नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम्।
शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात्।।44।।
तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुण:।
भ्रान्तेर्निश्चीयते* नेति** साधनं सम्प्रवर्तते।।45।। (पा0टि0- * **भ्रान्तेर्न निश्चय इति-रा0।)
वस्तुग्रहेऽनुमानाच्च धर्मस्यैकस्य निश्चये।
सर्वग्रहो* ह्यपोहे तु** नायं दोष: प्रसज्यते।।46।।
(पा0टि0-* **सर्वधर्मग्रहोऽपोहे-पाठा0।प्र0वा0 : 18।)
तस्मादपोहविषयमिति* लिङ्गं* प्रकीर्तितम्।
अन्यथा धर्मिण: सिद्धावसिद्धं** किमत: ** परम्।।47।।
(पा0टि0 -*विषयं लिङ्गमिति-रा0 ** ''नैनोपाधिविशिष्टस्य भेदिनोर्थस्य ग्राहिका।
उपकाराङ्गशक्तिभ्योऽभिन्नात्मनिश्चयग्रहे''।।-रा0।।)
क्वचित् सामान्यविषयं दृष्टे ज्ञानमलिङ्गजम्।
कथमन्यापोहविषयम् ? तन्मात्रापोहगोचरम्।।48।।
निश्चयारोपमनसोर्बाध्यबाधकभावत:।
समारोपविवेकेऽस्य प्रवृत्तिरिति गम्यते।।49।।
यावन्तोंऽशसमारोपास्तन्निरासे* विनिश्चया:*। (पा0टि0-*निश्चयास्तन्निरासत:-रा0)
तावन्त एव शब्दाश्च* तेन ते भिन्नगोचरा:*।।50।।(पा0टि0-*शब्दाभिव्यवच्छेदगोचरा:-रा0।)
अन्यथैकेन शब्देन व्याप्त एकत्र वस्तुनि।
बुद्ध्या वा नान्यविषय इति पर्यायता भवेत्।।51।।
यस्यापि नानोपाधेर्धीर्ग्राहिकार्थस्य भेदिन:।
नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे*।।52।। (पा0टि0 - * 'नानोपाधिविशिष्टस्य
भेदिनोऽर्थस्य ग्राहिका। उपकाराङ्गशक्तिभ्योऽभिन्नात्मनिश्चयग्रहे''।।-रा0।)
सर्वात्मनोपकार्यस्य* को भेद: स्यादनिश्चित:।

तयोरात्मनि सम्बन्धादेकज्ञाने द्वयग्रह:।।53।।(पा0टि0 -*सर्वात्मना कृते ग्राहे-रा0।)
धर्मोपकारशक्तीनां भेदे तास्तस्य किं यदि।
नोपकारस्ततस्तासां तदा स्यादनवस्थिति:।।54।।
एकोपकारके ग्राह्ये नोपकारास्ततोऽपरे*।
दृष्टे तस्मिन्नदृष्टाश्च तद्ग्रहे सकलग्रह:*।।55।।
(पा0टि0- *sदृष्टा: तस्मिन्न सन्ति ते; सर्वोपकारं ह्येकं–रा0।)
{न्यायमीमांसामतनिराकरणम्}
यदि भ्रान्तिनिवृत्त यर्थं गृहीतेऽप्यन्यदिष्यते।
तद्व्यवच्छेदविषयं सिद्धं तद्वत् ततोऽपरम्।।56।।
असमारोपविषये* वृत्तिरेपि च* निश्चयै:।
यन्न निश्चीयते रूपं तत् तेषां विषय: कथम्।।57।।(पा0टि0- *तद्विपक्षसमारोपविषये यदि-रा0।)
प्रत्यक्षेण गृहीतेऽपि विशेषैंऽशविवर्जिते।
यद्विशेषावसायेऽस्ति प्रत्यय: स प्रतीयते।।58।।
तत्रापि चान्यव्यावृत्तिरन्यव्यावृत्त इत्यपि।
शब्दाश्च निश्चयाश्चैव निमित्तमनुरुन्धते।।59।।
द्वयोरेकाभिधानेऽपि विभक्तिर्व्यतिरेकिणी।
भिन्नमर्थमिवान्वेति वाच्यलेशविशेषत:*।।60।। (पा0टि0 -* वाच्यते स विशेषत:-रा0।)
भेदान्तरप्रतिक्षेपाप्रतिक्षेपौ तयोर्द्वयो:।
पदं संकेतभेदस्य ज्ञातृवाञ्छानुरोधिन:।।61।।
भेदोऽयमेव सर्वत्र द्रव्यभावाभिधायिनो:।
शब्दयोर्न तयोर्वाच्ये विशेषस्तेन कश्चन।।62।।
जिज्ञापयिषुरर्थं तं तद्धितेन कृतापि वा।
अन्येन वा यदि ब्रूयात् भेदो नास्ति तत: पर:।।63।।
तेनान्यापोहविषये तद्वत्पक्षोपवर्णनम्*।
प्रत्याख्यातं पृथक्त्वे हि स्याद् दोषो जातितद्वतो:।।64।।(पा0टि0-* तद्दोषोपवर्णनम्-रा0।)
येषां वस्तुवशा वाचो न विवक्षापराश्रया:।
षष्ठीवचनभेदादि चोद्यं तान् प्रति युक्तमत्।।65।।
यद् यथा वाचकत्वेन वक्तृभिर्विनियम्यते।
अनपेक्षितबाह्यार्थं तत् तथा वाचकं वच:।।66।।
दारा: षण्णगरीत्यादौ भेदाभेदव्यवस्थिते:।
खस्य स्वभाव: खत्वं चेत्यत्र वा किं निबन्धनम्।।67।।
पररूपं स्वरूपेण यया संव्रियते धिया।

एकार्थप्रतिभासिन्या भावानाश्रित्य भेदिन:*।।68।। (पा0टि0-*कारिकेयं रा0 संस्करणे इत्थं दृश्यते-''एकार्थप्रतिभासिन्या भावानाश्रित्य भेदिना:। रूपं परेषां व्यावृत्तं सा धी: संवृतिरुच्यते।।" इति।)
तया संवृतनानात्वा: संवृत्या भेदिन: स्वयम्।
अभेदिन इवाभान्ति भावा* रूपेण केनचित्।।69।। (पा0टि0-*भेदा-रा0।)
तस्या अभिप्रायवशात् सामान्यं सत् प्रकीर्तितम्।
तदसत् परमार्थेन यथा सङ्कल्पितं तया*।।70।।
(पा0टि0-*यथा तयोपकल्पितं तदसत् परमार्थत:-रा0।)
व्यक्तयो नानुयन्त्यन्यदनुयायि न भासते।
ज्ञानादव्यतिरिक्तं वा कथमर्थान्तरं व्रजेत्।।71।।
तस्मान्मिथ्याविकल्पोऽयमर्थेष्वेकात्मताग्रह:।
इतरेतरभेदोऽस्य बीजं संज्ञा यदर्थिका।।72।।
एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने।
भेदेऽपि नियता: केचित् स्वभावेनेन्द्रियादिवत्।।73।।
ज्वरादिशमने काश्चित् सह प्रत्येकमेव वा।
दृष्टा यथा वौषधयो नानात्वेऽपि न चापरा:।।74।।
अविशेषान्न सामान्यमविशेषप्रसङ्गत:।
तासां क्षेत्रादिभेदेऽपि ध्रौव्याच्चानुपकारत:।।75।।
तत्स्वभावग्रहाद्* या* धीस्तदर्थैवाप्यनर्थिका। (पा0टि0- *तत्त्वभवविकल्पा-रा0।)
विकल्पिकाऽतत्कार्यार्थभेदनिष्ठा प्रजायते।।76।।
तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यत:।
व्यावृत्तमिव निस्तत्त्वं परीक्षानङ्गभावत:।।77।।
अर्था ज्ञाननिविष्टास्त एवं व्यावृत्तरूपका:।
अभिन्ना* इव चाभान्ति* व्यावृत्ता: पुनरन्यत:।।78।। (पा0टि0- *तेनाभिन्न इवाभान्ति-पाठा0।)
त एव तेषां सामान्यसमानाधारगोचरै:।
ज्ञानाभिधानैर्मिथ्यार्थो* व्यवहार:* प्रतन्यते।।79।। (पा0टि0- *नैर्व्यवहारो मिथ्यार्थ:-रा0।)
स च सर्व: पदार्थानामन्योन्याभावसंश्रय:।
तेनान्यापोहविषयो वस्तुलाभस्य* चाश्रय:*।।80।। (पा0टि0- *तदत्कार्यकारिणाम्-रा0।)
यत्रास्ति* वस्तुसम्बन्धो* यथाक्तानुमितौ यथा।
नान्यत्र भ्रान्तिसाम्येऽपि दीपतेजो मणौ यथा।।81।। (पा0टि0-*वस्तुलाभाश्रयो यत्र-रा0।)
तत्रैककार्योऽनेकोऽपि* तदकार्यान्यताश्रयै:। (पा0टि0- *तत्रानेकोऽपि कार्येका न तत्कार्यपराश्रयै:)
एकत्वेनाभिधाज्ञानै:* व्यवहार: प्रतार्यते।।82।।(पा0टि0- *ज्ञानाभिधानैरेकत्वात्-रा0।)

ततोऽनेककृदेकोऽपि तद्भावपरिदीपने*। (पा0टि0- *ततश्चैकोऽप्यनेककृत् तद्भावपरिदीपनात्)
अतत्कार्यार्थभेदेन नानाधर्मा* प्रतीयते।।83।।(पा0टि0- *नानाधर्म:-रा0। एवं वृत्तावपि।)
यथाप्रतीति कथित: शब्दार्थोऽसावसन्नपि।
सामानाधिकरण्यं च वस्तुन्यस्य न सम्भव:।।84।।
धर्मधर्मिव्यवस्थानं भेदोऽभेदश्च यादृश:।
असमीक्षिततत्त्वार्थो यथा लोके प्रतीयते।।85।।
तं तथैव समाश्रित्य साध्यसाधनसंस्थिति:।
परमार्थावताराय विद्वद्भिरवकल्प्यते।।86।।
संसृज्यन्ते न भिद्यन्ते स्वतोऽर्था: पारमार्थिका:।
रूपमेकमनेकं च तेषु बुद्धेरुपप्लव:।।87।।
भेदस्ततोयं* बौद्धेऽर्थे सामान्यं भेद इत्यपि।
तस्यैव चान्यव्यावृत्त्या धर्मभेद: प्रकल्प्यते।।88।। (पा0टि0- *ततोपि-रा0।)
साध्यसाधनसंकल्पे वस्तुदर्शनहानित:।
भेद: सामान्यसंसृष्टो ग्राह्यो नात्र स्वलक्षणम्।।89।।
समानभिन्नाद्याकारैर्न तद् ग्राह्यं कथञ्चन।
भेदानां बहुभेदानां तत्रैकस्मिन्नयोगत:।।90।।
तद्रूपं सर्वतो भिन्नं तथा तत्प्रतिपादिका।
न श्रुति: कल्पना वास्ति सामान्येनैव वृत्तित:।।91।।
शब्दा: संकेतितं प्राहुर्व्यवहाराय स स्मृत:।
तदा स्वलक्षणं नास्ति संकेतस्तेन तत्र न।।92।।
अपि प्रवर्त्तेत पुमान् विज्ञायार्थक्रियाक्षमान्।
तत्साधनायेत्यर्थेषु संयोज्यन्तेऽभिधाक्रिया: *।।93।। (पा0टि0- *भिधयका:-पाठा0।)
तत्रानर्थयाक्रियायोग्या जातिस्तद्वानलं* स च।
साक्षान्न योज्यते कस्मादानन्त्याच्चेदिदं समम्।।94।।
(पा0टि0- *अत्रानर्थक्रियायोग्या नास्ति तद्वानलं-रा0।)
तत्कारिणामतत्कारिभेदसाम्ये न किं कृत:।
तद्वद्दोषस्य साम्याच्चेदस्तु जातिरलं परा।।95।।
तदन्यपरिहारेण प्रवर्त्तेतेति च ध्वनि:।
उच्यते तेन तेभ्योऽस्याऽव्यवच्छेदे* कथं च स:।।96।।
(पा0टि0-*तेन तेभ्योऽव्यवच्छेद प्रवर्तेत-रा0।)
व्यवच्छेदोऽस्ति चेदस्य नन्वेतावत् प्रयोजनम्।
शब्दानामिति किं तत्र सामान्येनापरेण व:।।97।।

ज्ञानाद्यर्थक्रियां तांस्तां दृष्ट्वा भेदेऽपि कुर्वत:।
अर्थांस्तदन्यविश्लेषविषयैर्ध्वनिभि: सह।।98।।
संयोज्य प्रत्यभिज्ञानं कुर्यादप्यन्यदर्शने*।
परस्यापि न सा बुद्धि: सामान्यादेव केवलात्।।99।।(पा0टि0-*पूर्वदृष्टान्यदर्शने-रा0।)
नित्यं तन्मात्रविज्ञाने व्यक्त्यज्ञानप्रसङ्गत:।
तदा कदाचित् सम्बद्धस्यागृहीतस्य तद्वत:।।100।।
तद्वात्तनिश्चयो न स्याद् व्यवहारस्तत: कथम् ?।
एकवस्तुसहायाश्चेद् व्यक्तयो ज्ञानकारणम्।।101।।
तदेकं वस्तु किं तासां नानात्वं समपोहति।
नानात्वाच्चैकविज्ञानहेतुता तासु नेष्यते।।102।।
अनेकमपि यद्येकमपेक्ष्याभिन्नबुद्धिकृत्।
ताभिर्विनापि प्रत्येकं क्रियामाणां धियं प्रति।।103।।
तेनैकेनापि सामर्थ्यं* तासां नेत्यग्रहो धिया। (पा0टि0- *सामान्यात्-रा0।)
नीलादेर्नेत्रविज्ञाने पृथक् सामर्थ्यदर्शनात्।।104।।
शक्तिसिद्धि: समूहेऽपि नैवं व्यक्ते: कथञ्चन।
तासामन्यतमापेक्ष्यं तच्चेच्छक्तं न केवलम्।।105।।
तदेकमुपकुर्युस्ता: कथमेकां धियं च न।
कार्यञ्च* तासां प्राप्तोऽसौ जननं यदुपक्रिया।।106।। (पा0टि0- *कार्यञ्च-सर्वत्र।)
अभिन्नप्रतिभासा धीर्न भिन्नेष्विति चेन्मतम्।
प्रतिभासो धिया भिन्न: समाना इति तद्ग्रहात्।।107।।
कथं ता भिन्नधीग्राह्या: समाश्चेदेककार्यता।
सादृश्यं ननु धी: कार्यं तासां सा च विभिद्यते।।108।।
एकप्रत्यवमर्शस्य हेतुत्वाद् धीरभेदिनी।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता।।109।।
सा चातत्कार्यविश्लेषस्तदन्यस्यानुवर्तिन:।
अदृष्टे: प्रतिषेधाच्च संकेतस्तद्विदर्थिक:।।110।।
अतत्कारिविवेकेन प्रवृत्त यर्थतया श्रुति:।
अकार्यकृतितत्कारितुल्यरूपावभासिनीम्।।111।।
धियं वस्तुपृथग्भावमात्रबीजामनर्थिकाम्।
जनयन्त्यप्यतत्कारिपरिहाराङ्गभावत:।।112।।
वस्तुभेदाश्रयाच्चार्थे न विसंवादिका मता।
ततोऽन्यापोहविषया तत्कर्त्राश्रितभावत:।।113।।

अवृक्षव्यतिरेकेण वृक्षार्थग्रहणे द्वयम्।
अन्योन्याश्रयमित्येकग्रहाभावे द्वयाग्रह:।।114।।
सङ्केतासम्भवस्तस्मादिति केचित् प्रचक्षते।
तेषामवृक्षास्संकेते व्यवच्छिन्ना न वा; यदि।।115।।
व्यवच्छिन्ना:, कथं ज्ञाता: प्राग्वृक्षग्रहणादृते।
अनिराकरणे तेषां संकेते व्यवहारिणाम्।।116।।
न स्यात् तत्परिहारेण प्रवृत्तिर्वृक्षभेदवत्।
अविधाय निषिध्यान्यत् प्रदर्श्यैकं पुर: स्थितम्।।117।।
वृक्षोऽयमिति संकेत: क्रियते तत् प्रपद्यते।
व्यवहारेऽपि तेनायमदोष इति चेत्; तरु:।।118।।
अयमप्ययमेवेति प्रसङ्गो न निवर्त्तते।
एकप्रत्यवमर्शाख्ये ज्ञाने; एकत्र हि स्थित:।।119।।
प्रपत्ता* तदतद्धेतूनर्थान् विभजते स्वयम्:।
तद्बुद्धिवर्तिनो भावान् भातो** हेतुतया धिय:।120।। (पा0टि0-*प्रतिपत्ता-पाठा0 **भावो-पाठा0)
अहेतुरूपविकलानेकरूपानिव स्वयम्।
भेदेन प्रतिपद्येतेत्युक्तिर्भेदे नियुज्यते।।121।।
तं तस्या: प्रतियती* धी:* भ्रान्त्यैकं वस्त्ववेक्षते।
क्वचिन्निवेशनायार्थे विनिवर्त्य कुतश्चन्।।122।। (पा0टि0- * **धीर्विकल्पिका-रा0।)
बुद्धे: प्रयुज्यते शब्दस्तदर्थस्यावधारणात्।
व्यर्थोऽन्यथा प्रयोग: स्यात्; तज्ज्ञेयादिपदेष्वपि।।123।।
व्यवहारोपनीतेषु व्यवच्छेद्योऽस्ति कश्चन।
निवेशनं च यो यस्माद् भिद्यते विनिवर्त्य* तम्**।।124।।(पा0टि0-* ** तन्निवर्तनात्-रा0।)
तद्भेदे भिद्यमानानां समानाकारभासिनि।
स चायमन्यव्यावृत्त्या गम्यते तस्य वस्तुन:।।125।।
कश्चिद् भाग इति प्रोक्तो रूपं नास्यापि किञ्चन।
तद्गतावेव शब्देभ्यो गम्यतेऽन्यनिवर्तनम्।।126।।
न तत्र गम्यते कश्चिद् विशिष्ट:* केनचित्* पर:।
न चापि शब्दो द्वयकृदन्योन्याभाव इत्यसौ।।127।। (पा0टि0- *केनचिद् भेदवान्-रा0।)
अरूपो रूपवत्त्वेन दर्शनं बुद्धिविप्लव:।
तेनैवापरमार्थोऽसावन्यथा न हि वस्तुन:।।128।।
व्यावृत्तिर्वस्तु भवति भेदोऽस्यास्मादितीरणात्।
एकार्थश्लेषविच्छेद एको व्याप्रियते ध्वनि:।।129।।

लिङ्गं वा तत्र विच्छिन्नं वाच्यं वस्तु न किञ्चन।
यस्याभिधानतो वस्तुसामर्थ्यादखिले गति:।।130।।
भवेन्नानाफल: शब्द एकाधारो भवत्यत:।
विच्छेदं सूचयन्नेकमप्रतिक्षिप्य वर्त्तते।।131।।
यदान्यत्*; तेन स व्याप्त एकत्वेन च भासते।
सामानाधिकरण्यं स्यात् तदा बुद्ध्यनुरोधत:।।132।। (पा0टि0-*यदान्यं-पाठा0)
वस्तुधर्मस्य संस्पर्शो विच्छेदकरणे ध्वने:।
स्यात् सत्यं स* हि तत्रेति* नैकवस्त्वभिधायिनि।।133।। (पा0टि0- *सति तवे हि-रा0।)
बुद्धावभासमानस्य दृश्यस्याभावनिश्चयात्।
तेनान्यापोहविषया: प्रोक्ता: सामान्यगोचरा:।।134।।
शब्दाश्च बुद्धयश्चैव वस्तुन्येषामसम्भवात्।
एकत्वाद् वस्तुरूपस्य भिन्नरूपा मति: कुत:।।135।।
अन्वयव्यतिरेकौ वा नैकस्यैकार्थगोचरौ।
अभेदव्यवहारश्च भेदे स्युरनिबन्धना:।।136।।
सर्वत्र भावाद् व्यावृत्तेर्नैते दोषा: प्रसंगिन:।
एककार्येषु भावेषु* तत्कार्यपरिचोदने।।137।। (पा0टि0-*भेदेषु-पाठा0।)
गौरवाशक्तिवैफल्याद् भेदाख्याया: समा श्रुति:।
कृता वृद्धैरतत्कार्यव्यावृत्तिविनिबन्धना।।138।।
न भावे सर्वभावानां स्वस्वभावव्यवस्थिते:।
यद् रूपं शाबलेयस्य बाहुलेयस्य नास्ति तत्।।139।।
अतत्कार्यपरावृत्तिर्द्वयोरपि च विद्यते।
अर्थाभेदेन च विना शब्दाभेदो न युज्यते।।140।।
तस्मात् तत्कार्यतापीष्टाऽतत्कार्यादेव भिन्नता।
चक्षुरादौ* यथा रूपविज्ञानैकफले* क्वचित्।।141।।
(पा0टि0-*चक्षुरादावनेकत्र रूपविज्ञानके रा0।)
अविशेषेण तत्कार्यचोदनासम्भवे सति।
सकृत् सर्वप्रतीत्यर्थं कश्चित् सांकेतकीं श्रुतिम्।।142।।
कुर्याद् ऋतेऽपि तद्रूपसामान्याद् व्यतिरेकिण:।
एकवृत्तेरनेकोऽपि यद्येकश्रुतिमान् भवेत्।।143।।
वृत्तिराधेयता व्यक्तिरिति तस्मिन्न युज्यते।
नित्यस्यानुपकार्यत्वात् नाधार:; प्रविसर्पत:।।144।।
शक्तिस्तद्देशजननं कुण्डादेर्बदरादिषु।

न सम्भवति साप्यत्र तदभावेऽप्यवस्थिते:।।145।।
न स्थिति: साप्ययुक्तैव भेदाभेदविवेचने।
विज्ञानोत्पत्तियोग्यत्वायात्मन्यन्यानुरोधि यत्।।146।।
तद् व्यङ्ग्यं ्तद्योग्यतायाश्च कारणं कारकं मतम्।
प्रागेवास्य च योग्यत्वे तदपेक्षा न युज्यते।।147।।
सामान्यस्याविकार्यस्य तत्सामान्यवत: कुत:।
अञ्जनादेरिव व्यक्ते: संस्कारो नेन्द्रियस्य* च*।।148।।(पा0टि0- *sक्षस्य न भवेत्-रा0।)
प्रतिपत्तेरभिन्नत्वात्* तद्भावाभावकालयो:।
व्यञ्जकस्य च जातीनां जातिमत्ता यदीष्यते।।149।। (पा0टि0-*तत्प्रतिपत्ते0-रा0।)
प्राप्तो गोत्वादिना तद्वान् प्रदीपादि: प्रकाशक:।
व्यक्तेरन्याथ वानन्या येषां जातिस्तु विद्यते।।150।।
तेषां व्यक्तिष्वपूर्वासु कथं सामान्यबुद्धय:।
एकत्र तत्सतोऽन्यत्र* दर्शनासम्भवात् सत:।।151।।(पा0टि0- *दृष्टस्यान्यत्र-रा0।)
अनन्यत्वेऽन्वयाभावादन्यत्वेऽप्यनपाश्रयात्।
न याति न च तत्रासीदस्ति पश्चान्न चांशवत्।।152।।
जहाति पूर्वं नाधारमहो व्यसनसन्तति:।।
अन्यत्र वर्त्तमानस्य ततोऽन्यस्थानजन्मनि।।153।।
स्वस्मादचलत: * स्थानाद् वृत्तिरित्यतियुक्तिमत्*।
यात्रासौ वर्त्तते भावस्तेन सम्बध्यतेऽपि त।।154।।
(पा0टि0- *स्वस्थानादचलतोऽन्यत्र वृत्तिरयुक्तिमत्-रा0।)
तेद्देशिनञ्च व्याप्नोति किमप्येतन्महाद्भुतम्!।
व्यक्त्यैवैकत्र* सा** व्यक्ताऽभेदात् सर्वत्रगा यदि**।।155।।
(पा0टि0- *व्यक्तेवैकत्र-पाठा0। **व्यक्ताथ सर्वगा जातिरिष्यते-रा0।)
सर्वत्र दृश्येताभेदात् सापि न* व्यक्तयपेक्षिणी। (पा0टि0- *जातिर्दृश्येत सर्वत्र न च सा-पाठा0)
व्यञ्जकस्याप्रतीतौ न व्यङ्ग्यं सम्यक् प्रतीयते*।।156।।
(पा0टि0- *व्यञ्जकाप्रतिपत्तौ हि न व्यङ्ग्यं सम्प्रतीयते-पाठा0।)
विपर्यय: पुन: कस्मादिष्ट: सामान्यतद्वतो:।
पाचकादिष्वभिन्नेन विनाप्यर्थेन वाचक:।।157।।
भेदान्न हेतु: कर्मास्य न जाति: कर्मसंश्रयात्।
श्रुत्यन्तरनिमित्तत्वात् स्थित्यभावाच्च* कर्मण:*।।158।। (पा0टि0- *कर्मणे न निमित्तता-रा0।)
असम्बन्धन्न सामान्यं नायुक्तं शब्दकारणात्*।
अतिप्रसंगात्; कर्मापि नासत्, ज्ञानाभिधानयो:।।159।। (पा0टि0- *शब्दकारणम्-पाठा0।)

अनैमित्तिकतापत्ते:; न च शक्तिरनन्वयात्।
सामान्यं पाचकत्वादि यदि प्रागेव तद् भवेत्।।160।।
व्यक्तं सत्तादिवन्नो चेन्न पश्चादविशेषत:।
क्रियोपकारापेक्षस्य व्यञ्जकत्वेऽविकारिण:।।161।।
नापेक्षातिशयेऽप्यस्य* क्षणिकत्वात् क्रिया कुत:।
तुल्ये भेदे यया जाति: प्रत्यासत्त्या प्रसर्पति।।162।।(पा0टि0- *अतिशये वा प्यस्य-रा0।)
क्वचिन्नान्यत्र सैवास्तु शब्दज्ञाननिबन्धनम्।

{साङ्ख्यमतनिराकरणम्}

न निवृत्तिं विहायास्ति यदि भावान्वयोऽपर:।।163।।
एकस्य कार्यमन्यस्य न स्यादत्यन्तभेदत:?।
यद्येकात्मतयानेक: कार्यस्यैकस्य कारक:।।164।।
आत्मैकत्रापि वास्तीति व्यर्था: स्यु: सहकारिण:।
नापैत्यभिन्नं तद् रूपं विशेषा: खल्वपायिन:।।165।।
एकापाये फलाभावाद् विशेषेभ्यस्तदुद्भव:।
स पारमार्थिको भावो य एवार्थक्रियाक्षम:।।166।।
स च नान्वेति, योऽन्वेति न तस्मात् कार्यसम्भव:।
तेनात्मनापि* भेदे हि हेतु:* कश्चिन्न चापर:।।167।।(पा0टि0- *तेनात्मना भिमपि-पाठा0।)
स्वभावोऽयम्, अभेदे तु स्यातां नाशोद्भवौ सकृत्।
भेदोऽपि तेन नैवं चेद् य एकस्मिन् विनश्यति।।168।।
तिष्ठत्यात्मा न तत्यातो न स्यात् सामान्यभेदधी:।
निवृत्तेर्नि:स्वभावत्वात् न स्थानास्थानकल्पना।।169।।
उपप्लवश्च सामान्यधियस्तेनाप्यदूषणा।
यत् तस्य जनकं रूपं ततोऽन्यो जनक: कथम्।।170।।
भिन्ना विशेषा जनका:; अस्त्यभेदोपि* तेषु चेत्।
तेन तेऽजनका: प्रोक्ता:; प्रतिभासोऽपि भेदक:।।171।। (पा0टि0 -* अप्यभेदोऽपि-रा0।)
अनन्यभाक् स एवार्थस्तस्य व्यावृत्तयोऽपरे।
तत् कार्यं कारणं चोक्तं तत् स्वलक्षणमिष्यते।।172।।
तत्त्यागाप्तिफला: सर्वा: पुरुषाणां प्रवृत्तय:।
यथाऽभेदाविशेषेऽपि न सर्वं सर्वसाधनम्।।173।।
तथाभेदाविशेषेऽपि* न सर्वं सर्वसाधनम्।।
भेदे हि कारकं किञ्चिद वस्तुधर्मतया भवेत्।।174।।(पा0टि0 -* तथाऽभेदाविशेषेऽपि-रा0।)
अभेदे तु विरुध्येते तस्यैकस्य क्रियाक्रिये।

भेदोऽप्यस्त्यक्रियातश्चेत्* न कुर्यु: सहकारिण:।।175।।(पा0टि0-* भेदेश्चेदक्रियाहेतु:-क0।)
पर्यायेणाथ कर्तृत्वं स किं तस्यैव वस्तुन:।
अत्यन्तभेदाभेदौ तु* स्यातां तद्वति वस्तुनि।।176।। (पा0टि0 - *हि-पाठ0।)
अन्योन्यं वा तयोर्भेद: सदृशासदृशात्मनो:।
तयोरपि भवेद् भेदो यदि येनात्मना तयो:।।177।
भेद: सामान्यमित्येतद् यदि भेदस्तदात्मना।
भेद एव; तथा च स्यान्नि:सामान्यविशेषता।।178।।
भेदसामान्ययोर्यद्वद् घटादीनां परस्परम्।
यमात्मानं पुरस्कृत्य पुरुषोऽयं प्रवर्तते।।179।।
तत्साध्यफलवाञ्छावान् भेदाभेदौ तदाश्रयो।
चिन्त्येते स्वात्मना भेद:; व्यावृत्त या च समानता।।180।।
अस्त्येव वस्तु नान्वेति प्रवृत्त यादिप्रसङ्गत:।

{जैनमतनिराकरणम्}

एतेनैव यदह्रीका:* किमप्यश्लीलमाकुलम्*।।181।।(पा0टि0-*यदाह्रीका:-रा0; *प्ययुक्तमा0-रा0।)
प्रलपन्ति प्रतिक्षिप्तं तदप्येकान्तसम्भवात्।
सर्वस्योभयरूपत्वे तद्विशेषनिराकृते:।।182।।
चोदितो दधि खादेति किमुष्टं नाभिधावति।
अथास्त्यतिशय: कश्चिद् येन भेदेन वर्त्तते।।183।।
स एव दधि* सोऽन्यत्र* नास्तीत्यनुभयं परम्।
सर्वात्मत्वे च सर्वेषां भिन्नौ स्यातां न धीध्वनी।।184।। (पा0टि0- *विशेषोन्यत्र-रा0।)
भेदसंहारवादस्य तदभेदादसम्भव:*। (पा0टि0 -* तदभावासम्भव:-पाठा0।)

{शब्दविचार:}

रूपाभावादभावस्य* शब्दा रूपाभिधायिन:।।185।। (पा0टि0-* द्रव्याभवा0-रा0।
नाशंक्या एव सिद्धास्तेऽतो व्यवच्छेदवाचका:।
उपाधिभेदापेक्षो वा स्वभाव: केवलोऽथ वा।। 186।।
उच्यते साध्यसिद्ध्यर्थं नाशे कार्यत्वसत्त ववत्।
सत्तास्वभावो हेतुश्चेत् सा* सत्ता साध्यते कथम्।। 187।। (पा0टि0-* न-पाठा0।)
अनन्वयो* हि भेदानां* व्याहतो हेतुसाध्ययो:?।
भावोपादानमात्रे तु साध्ये सामान्यधर्मिणि।। 188।।(पा0टि0- *भेदेनानव्यात् सोऽयं-रा0।)
न कश्चिदर्थ: सिद्ध: स्यादनिषिद्धं च तादृशम्।
उपात्तभेदे साध्येऽस्मिन् भवेद्धेतुरनन्वय:।। 189।।
सत्तायां तेन साध्यायां विशेष: साधितो भवेत्।

अपरामृष्टतद्भेदे वस्तुमात्रे तु साधने।।190।।
तन्मात्रव्यापिन: साध्यस्यान्वयो न विहन्यते।
नासिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रय:।।191।।
धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथम्!
सिद्ध: स्वभावो गमको व्यापकस्तस्य* निश्चित:*।।192।।
(पा0टि0- *sतो गम्यस्तस्य व्यापक:-रा0।)
गम्य:* स्वभावस्तस्यायं* स्वनिवृत्तौ* निवर्तक:।
(पा0टि0 - *सिद्ध: स्वभावनियत:-रा0; *निवृत्तौ वा-पाठा0।)

{अहेतुकविनाश:}

अनित्यत्वे यथा कार्यमकार्यं वाऽविनाशिनि।।193।।
अहेतुत्वाद् विनाशस्य स्वभावादनुबन्धिता।
सापेक्षाणां हि भावानां नावश्यम्भावितेक्ष्यते।।194।।
बाहुल्येऽपीति* चेत्* तस्य हेतो: क्वचिदसम्भव:।
एतेन व्यभिचारित्वमुक्तं कार्याव्यवस्थिते:।।195।। (पा0टि0-*बाहुल्येऽपि हि-पाठा0)
सर्वेषां नाशहेतूनां हेतुमन्नाशवादिनाम्।
असामर्थ्याच्च तद्धेतोर्भवत्येव स्वभावत:।।196।।
यत्र नाम भवत्यस्मादन्यत्रापि स्वभावत:।
या काचिद् भावविषयाऽनुमितिर्द्विविधैव* सा*।।197।।(पा0टि0 - *द्विधैवानुमितिस्तत:-पाठा0)
स्वसाध्ये कार्यभावाभ्यां सम्बन्धनियमात् तयो:।

{अनुपलब्धिचिन्ता}

प्रवृत्तेर्बुद्धिपूर्वत्वात् तद्भावानुपलम्भने।।198।।
प्रवर्त्तितव्यं नेत्युक्ताऽनुपलब्धे: प्रमाणता।।
शास्त्राधिकारेऽसम्बद्धा* बहवोऽर्था अतीन्द्रिया:।।199।।(पा0टि0*शास्त्राधिकारासम्बद्धा-रा0)
अलिङ्गाश्च कथं तेषामभावोऽनुपलब्धित:।
सदसन्निश्चयफला नेति स्याद् वाऽप्रमाणता।।200।।
प्रमाणमपि काचित् स्याद् लिङ्गातिशयभाविनी।
स्वभावज्ञापकाज्ञानस्यायं न्याय उदाहृत:।।201।।
कार्ये तु कारकाज्ञानमभावस्यैव साधकम्।
स्वभावानुपलम्भश्च स्वभावेऽर्थस्य लिङ्गिनि।।202।।
तदभाव: प्रतीयेत हेतुना यदि केनचित्।
दृश्यस्य दर्शनाभावकारणाऽसम्भवे सति।।203।।
भावस्यानुपलब्धस्य* भावाभाव: प्रतीयते।

विरुद्धस्य च भावस्य भावे तद्भावबाधनात्।।204।।(पा0टि0- *नुपलम्भस्य-रा0)
तद्विरुद्धोपलब्धौ स्यादसत्ताया विनिश्चय:।
अनादिवासनोद्भूतविकल्पपरिनिष्ठित:।।205।।
शब्दार्थस्त्रिविधो धर्मी भावाभावोभयाश्रय।
तस्मिन् भावानुपादाने साध्येऽस्यानुपलम्भनम्।।206।।
तथा हेतुर्न तस्यैवाभाव: शब्दप्रयोगत:।
परमार्थैकतानत्वे शब्दानामनिबन्धना।।207।।
न स्यात् प्रवृत्तिरर्थेषु दर्शनान्तरभेदिषु।
अतीताजातयोर्वापि न च स्यादनृतार्थता।।208।।
वाच: कस्याश्चिदित्येषा बौद्धार्थविषया मता।
शब्दार्थापह्नवे साध्ये धर्माधारनिराकृते:।।209।।
न साध्य: समुदाय: स्यात् सिद्धो धर्मश्च केवल:।
सदसत्पक्षभेदेन शब्दार्थानपवादिभि:।।210।।
वस्त्वेव चिन्त्यते ह्यत्र प्रतिबद्ध: फलोदय:।
अर्थक्रियाऽसमर्थस्य विचारै: किं परीक्षया।।211।।
षण्ढस्य रूपे* वैरूप्ये* कामिन्या: किं परीक्षया।
शब्दार्थ: कल्पनाज्ञानविषयत्वेन कल्पित:।।212।। (पा0टि0-*रूपवैरूप्ये-पाठा0)
धर्मो वस्त्वाश्रयासिद्धिरस्योक्ता* न्यायवादिना। (पा0टि0- *रस्यक्तो-पाठा0।)

{आगमविचार:}

नान्तरीयकताऽभावाच्छब्दानां वस्तुभिस्सह।।213।।
नार्थसिद्धिस्ततस्ते हि वक्त्रभिप्रायसूचका:।
आप्तवादाविसंवादसामान्यादनुमानता* ?।।214।।
(पा0टि0-*कारिकांशोऽयं 217 कारिकायामप्यक्षरशो दृश्यते)
सम्बद्धानुगुणोपायं पुरुषार्थाभिधायकम्।
परीक्षाधिकृतं वाक्यमतोऽनधिकृतं परम्।।215।।
प्रत्यक्षेणानुमानेन द्विविधेनाप्यबाधनम्।
दृष्टादृष्टार्थयोरस्याविसंवादस्तदर्थयो:।।216।।
आप्तवादाविसंवादसामान्यादनुमानता।
बुद्धेरगत्याभिहिता निषिद्धाप्यस्य गोचरे।।217।।
हेयोपादेयतत्त्वस्य सोपायस्य प्रसिद्धित:।
प्रधानार्थाविसंवादानुमानं परत्र वा।।218।।
पुरुषातिशयापेक्षं यथार्थमपरे विदु:।

इष्टोऽयमर्थ: प्रत्येतुं शक्य: सोऽतिशयो यदि।।219।।

{पौरुषेयत्वविचार:}

अयमेवं न वेत्यन्यदोषा निर्दोषतापि वा।
दुर्लभत्वात् प्रमाणानां दुर्बोधेत्यपरे विदु:।।220।।
सर्वेषां सविपक्षत्वान्निर्ह्रासातिशयश्रिताम्*।
सात्मीभावात् तदभ्यासाद् हीयेरन्नास्रवा: क्वचित्।।221।। (पा0टि0-*तिशयं श्रित:-रा0।)
निरुपद्रवभूतार्थस्वभावस्य विपर्ययै:।
न बाधा यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपातत:।।222।।
सर्वासां दोषजातीनां जाति: सत्कार्यदर्शनात्।
साऽविद्या तत्र तत्स्नेहस्तस्माद् द्वेषादिसम्भव:।।223।।
मोहो निदानं दोषाणामत एवाभिधीयते।
सत्कायदृष्टिरन्यत्र; तत्प्रहाणे प्रहाणत:।।।224।।

{अपौरुषेयत्वविचार:}

{वेदप्रामाण्यनिराकरणम्}

गिरां मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात्।
अपौरुषेयं सत्यार्थमिति केचित् प्रचक्षते।।225।।
गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयात्।
अपौरुषेयं मिथ्यार्थं किं नेत्यन्ये प्रचक्षते।।226।।
अर्थज्ञापनहेतुर्हि संकेत: पुरुषाश्रय:।
गिरामपौरुषेयत्वेऽप्यतो मिथ्यात्वसम्भव:।।227।।
सम्बन्धापौरुषेयत्वे स्यात् प्रतीतिरसंविद:।
संकेतात् तदभिव्यक्तावसमर्थान्यकल्पना।।228।।
गिरामेकार्थनियमे न स्यादर्थान्तरे गति:।
अनेकार्थाभिसम्बन्धे विरुद्धव्यक्तिसम्भव:।।229।।
अपौरुषेयतायाश्च* व्यर्था स्यात् परिकल्पना। (पा0टि0- *अपौरुषेयतायाच्च-रा0)
वाच्यश्च हेतुर्भिन्नानां सम्बन्धस्य व्यवस्थिते:।।230।।
असंस्कार्यतया पुम्भि: सर्वथा स्यान्निरर्थता।
संस्कारोपगमे मुख्यं गजस्नानमिदं* भवेत्।।231।। (पा0टि0-*गजस्नाननिभं-रा0)

{सम्बन्धविचार:}

सम्बन्धिनामनित्यत्वान्न सम्बन्धेऽस्ति नित्यता।
नित्यस्यानुपकार्यत्वादकुर्वाणश्च नाश्रय:।।232।।
अर्थैरत: स शब्दानां संस्कार्य: पुरुषैर्धिया।

अर्थैरेव सहोत्पादे न स्वभावविपर्यय:।।233।
शब्देषु युक्त:; सम्बन्धे नायं दोषो विकल्पिते।
नित्यत्वादाश्रयापायेऽप्यनाशो यदि जातिवत्*।।234।। (पा0टि0- *सम्मत:-रा0)
नित्येष्वाश्रयसामर्थ्यं किं येनेष्ट: स चाश्रय:।
ज्ञानोत्पादनहेतूनां* सम्बन्धात् सहकारिणाम्।।235।।
(पा0टि0-*ज्ञानोत्पादेन हेतूनां-रा0। एवं वृत्तावपि।)
तदुत्पादनयोग्यत्वेनोत्पत्तिर्व्यक्तिरिष्यते।
घटादिष्वपि युक्तिज्ञै:; अविशेषेऽविकारिणाम्।।236।।
व्यञ्जकै: स्वै: कृत:* कोऽर्थो व्यक्तास्तैस्ते यतो मता:।
सम्बन्धस्य च वस्तुत्वे स्याद् भेदाद् बुद्धिचित्रता।।237।।(पा0टि0-*कुत:-रा0। एवं वृत्तावपि)
ताभ्यामभेदे तावेव नातोऽन्या वस्तुनो गति:।
भिन्नत्वाद् वस्तुरूपस्य सम्बन्ध: कल्पनाकृत:।।238।।
सद् द्रव्यं स्यात् पराधीनं सम्बन्धोऽन्यस्य वा कथम्।
वर्णा निरर्थका: सन्त: पदादिपरिकल्पितम्।।239।।
अवस्तुनि कथं वृत्ति: सम्बन्धस्यास्य वस्तुन:।
अपौरुषेयतापीष्टा कर्तृणामस्मृते: किल।।240।।
सन्त्यस्याप्यनुवक्तार इति धिग् व्यापकं तम:।

{कुमारिलमतखण्डनम्}

यथायमन्यतोऽश्रुत्वा नेमं वर्णपदक्रमम्।।241।।
वक्तुं समर्थ: पुरुषस्तथान्योऽपीति कश्चन।
अन्यो वा रचितो ग्रन्थ: सम्प्रदायाद् ऋते परै:।।242।
दृष्ट: कोऽभिहितो येन सोऽप्येवं नानुमीयते।
यज्जातीयो यत: सिद्ध: सोऽविशिष्टोऽग्निकाष्ठवत्*।।243।।
(पा0टि0-*स तस्मादग्निकाष्ठवत्-पाठा0)
अदृष्टहेतुरप्यन्यस्तद्भव: सम्प्रतीयते।
तत्राप्रदर्श्य ये भेदं कार्यसामान्यदर्शनात्।।244।।
हेतव: प्रवितन्यन्ते सर्वे ते व्यभिचारिण:।
सर्वथाऽनादिता सिध्येदेवं नापुरुषाश्रय:।।245।।
तस्मादपौरुषेयत्वे स्यादन्योप्यनराश्रय:।
म्लेच्छादिव्यवहाराणां नास्तिक्यवचसामपि।।246।।
अनादित्वाद् तथाभाव:; पूर्वसंस्कारसन्तते:।
तादृशेऽपौरुषेयत्वे क: सिद्धेऽपि गुणो भवेत्।।247।।

अर्थसंस्कारभेदानां दर्शनात् संशय: पुन:।
अन्याविशेषाद् वर्णानां साधने कि फलं भवेत्।।248।।
वाक्यं भिन्नं न वर्णेभ्यो विद्यतेऽनुपलम्भत:।
अनेकावयवात्मत्वे पृथक् तेषां निरर्थता।।249।।
अतद्रूपे च तद्रूप्यं कल्पितं सिंहतादिवत्।
प्रत्येकं सार्थकत्वेऽपि मिथ्यानेकत्वकल्पना।।250।।
एकावयवगत्या च वाक्यार्थप्रतिपद् भवेत्।
सकृच्छ्रुतौ च सर्वेषां कालभेदो न युज्यते।।251।।
{स्फोटनिरसनम्}
एकत्वेऽपि ह्यभिन्नस्य क्रमशो गत्यसम्भवात्।
अनित्यं यत्नसम्भूतं पौरुषेयं कथं न तत्!।।252।।
नित्योपलब्धिर्नित्यत्वेऽप्यनावरणसम्भवात्।
अश्रुतिर्विकलत्वाच्चेत् कस्यचित् सहकारिण:।।253।।
काममन्यप्रतीक्षाऽस्तु*, नियमस्तु विरुध्यते। (पा0टि0- *काममन्यप्रतीक्षो:-रा0।)
सर्वत्रानुपलम्भ: स्यात् तेषामव्यापिता यदि।।254।।
सर्वेषामुपलम्भ: स्यात् युगपद् व्यापिता यदि।
संस्कृतस्योपलम्भे च क: संस्कर्त्ताऽविकारिण:।।255।।
इन्द्रियस्य* स्यात्* संस्कार: श्रृणुयान्निखिलं च तत्। (पा0टि0- *इन्द्रिये स्याद्धि-पाठा0)
संस्कारभेदभिन्नत्वादेकार्थनियमो* यदि।।256।।(पा0टि0-*संस्कारभेदाद् भिन्न-रा0।)
अनेकशब्दसंघाते श्रुति: कलकले कथम्?।
ध्वनय: केवलं तत्र श्रूयन्ते चेन्न वाचका:।।257।।
ध्वनिभ्यो भिन्नमस्तीति श्रद्धेयमति* बह्विदम्*। (पा0टि0- *0मविवक्षित्-रा0।)
स्थितेष्वन्येषु शब्देषु श्रूयते वाचक: कथम्।।258।।
कथं वा शक्तिनियमाद् भिन्नध्वनिगतिर्भवेत्।
ध्वनय: मम्मता यैस्ते दोषै: कैरप्यवाचका:।।259।।
ध्वनिभिर्व्यज्यमानेऽस्मिन् वाचकेऽपि कथं न ते!।
वर्णानुपूर्वी वाक्यं चेन्न वर्णानामभेदत:।।260।।
तेषां च न व्यवस्थानं क्रमान्तरविरोधत:।
देशकालक्रमाभावो व्याप्तिनित्यत्ववर्णनात्।।261।।
अनित्याव्यापितायां च दोष: प्रागेव कीर्त्तित:।
व्यक्तिक्रमोऽपि वाक्यं न नित्यव्यक्तिनिराकृते:।।262।।
व्यापारादेव तत्सिद्धे: करणानां च कार्यता।

स्वज्ञानेनान्यधीहेतु: सिद्धेऽर्थे व्यञ्जको मत:।।263।।
यथा दीपोऽन्यथा वापि को विशेषोऽस्य कारकात्।
करणानां समग्राणां व्यापारादुपलब्धित:।।264।।
नियमेन च कार्यत्वं व्यञ्जके तदसम्भवात्।
तद्रूपावरणानां च व्यक्तिस्ते विगमो यदि।265।।
अभावे करणग्रामसामर्थ्यं किं नु* तद्भवेत्। (पा0टि0- *न-पाठा0।)
शब्दाविशेषादन्येषामपि व्यक्ति: प्रसज्यते।।266।।
तथाभ्युपगमे सर्वकारकाणां* निरर्थता। (पा0टि0-*कारणानां-पाठा0।)
साधनं प्रत्यभिज्ञानं सत्प्रयोगादि यन्मतम्।।267।।
अनुदाहरणं सर्वभावानां क्षणभङ्गत:।
दूष्य: कुहेतुरन्योऽपि; बुद्धेरपुरुषाश्रये।।268।।
बाधाभ्युपेतप्रत्यक्षप्रतीतानुमितै: समम्।
आनुपूर्व्याश्च वर्णेभ्यो भेद: स्फोटेन चिन्तित:।।269।।
कल्पनारोपिता सा स्यात् कथं वाऽपुरुषाश्रया।
सत्तामात्रानुबन्धित्वात् नाशस्यानित्यता ध्वने:।।270।।
अग्नेरर्थान्तरोत्पत्तौ भवेत् काष्ठस्य दर्शनम्।
अविनाशात् स, एवास्य विनाश इति चेत्, कथम्।।271।।
अन्योन्यस्य* विनाशोऽस्तु* काष्ठं कस्मान्न दृश्यते।
(पा0टि0-*अन्योऽर्थोऽन्यस्य नाशोस्तु-रा0।)
तत्परिग्रहतश्चेन्न तेनानावरणं यत:।।272।।
विनाशस्य विनाशित्वम्; स्यादुत्पत्तेस्तत: पुन:।
काष्ठस्य दर्शनम्; हन्तृघाते चैत्रापुनर्भव:।।273।।
यथात्राप्येवमिति चेत् हन्तुर्नामरणत्वत:।
अनन्यत्वे विनाशस्य स्यान्नाश: काष्ठमेव तु।।274।।
तस्य* सत्त्वादहेतुत्वं* नातोऽन्या विद्यते गति:। (पा0टि0-*तस्यासत्त्वा0-रा0।)
अहेतुत्वेऽपि नाशस्य नित्यत्वाद् भावनाशयो:।।275।।
सहभावप्रसङ्गश्चेदसतो नित्यता कुत:!।
असत्त्वेऽभावनाशित्वप्रसङ्गोऽपि न युज्यते।।276।।
नाशेन यस्माद् भावस्य न विनाशनमिष्यते।
नश्यन् भावोऽपरापेक्ष* इति* तज्ज्ञापनाय सा।।277।।(पा.टि.-*भव: परापेक्षो न तस्य ज्ञाप.-रा0)
अवस्थाऽहेतुरुक्तास्या भेदमारोप्य चेतसा।
स्वतोऽपि भावेऽभावस्य विकल्पश्चेदयं सम:।।278।।

न तस्य किञ्चिद् भवति न भवत्येव केवलम्।
भावे ह्येष विकल्प: स्याद् विधेर्वस्त्वनुरोधत:।।279।।
न भावो भवतीत्युक्तमभावो भवतीति* न*।
अपेक्ष्येत** पर: कार्यं यदि विद्येत किञ्चन।।280।।(पा0टि0- *भक्तीत्यपि-पाठा0 **अपेक्षेत-रा0)
यदकिञ्चित्करं वस्तु किं केनचिदपेक्ष्यते।
एतेनाहेतुकत्वेऽपि ह्यभूत्वा नाशभावत:।।281।।
सत्तानाशित्वदोषस्य प्रत्याख्यातं प्रसञ्जनम्।
यथा केषाञ्चिदेवेष्ट: प्रतिघो जन्मिनां तथा।।282।।
नाश: स्वभावो भावानां नानुत्पत्तिमतां यदि।
स्वभावनियमाद्धेतो: स्वभावनियम: फले।।283।।
नानित्ये रूपभेदोऽस्ति भेदकानामभावत:।
प्रत्याख्येयाऽत एवैषां सम्बन्धस्यापि नित्यता।।284।।
सम्बन्धदोषै: प्रागुक्तै: शब्दशक्तिश्च दूषिता।

{भाट्टमतनिराकरणम्}

नाऽपौरुषेयमित्येव यथार्थज्ञानसाधनम्।।285।।
दृष्टोऽन्यथापि वह्न्यादिरदुष्ट: पुरुषागसा।
न ज्ञानहेतुतैव स्यात् तस्मिन्नकृतके मते।।286।।
नित्येभ्यो वस्तुसामर्थ्यात् न हि* जन्मास्ति कस्यचित्। (पा0टि0-*च0-रा0।)
विकल्पवासनोद्भूता: समारोपितगोचरा:।।287।।
जायन्ते बुद्धयस्तत्र केवलं नार्थगोचरा:।
मिथ्यात्वं कृतकेष्वेव दृष्टमित्यकृतं वच:।।288।।
सत्यार्थं व्यतिरेकस्य विरोधिव्यापनाद् यदि।
हेतावसम्भवेऽनुक्ते* भावस्तस्यापि* शङ्क्य् ते।।289।।
(पा0टि0- *हेतावसम्भवे भावस्तत्तस्यापि-रा0।)
विरुद्धानां पदार्थानामपि व्यापकदर्शनात्।
नासत्तासिद्धिरित्युक्तं सर्वतोऽनुपलम्भनात्।।290।।
असिद्धायामसत्तायां सन्दिग्धा व्यतिरेकिता।
अन्वयो व्यतिरेको वा सत्त्वं वा साध्यधर्मिणि।।291।।
तन्निश्चयफलैर्ज्ञानै: सिद्ध्यन्ति यदि साधनम्।
यत्र साध्यविपक्षस्य वर्ण्यते व्यतिरेकिता।।292।।
स एवास्य सपक्ष: स्यात् सर्वो हेतुरतोऽन्वयी*। (पा0टि0- *हेतुरनन्वयी-रा0। एवं वृत्तावपि)

समयत्वे हि मन्त्राणां कस्यचित् कार्यसाधनम्*।।293।।(पा0टि0- *कार्यदर्शनम्-रा0)
अथापि भावशक्ति: स्यादन्यथाप्यविशेषत:*।
क्रमस्यार्थान्तरत्वं च पूर्वमेव निराकृतम्।।294।।(पा0टि0-*दन्यत्राप्य0-पाठा0।)
नित्यं तदर्थसिद्धि: स्यादसामर्थ्यमपेक्षणे।
सर्वस्व साधनं ते स्युर्भावशक्तिर्यदीदृशी।।295।।
प्रयोक्तृभेदापेक्षा च नासंस्कार्यस्य युज्यते।
संस्कार्यस्यापि भावस्य वस्तुभेदो हि भेदक:।।296।।
प्रयोक्तृभेदान्नियम: शक्तौ न समये भवेत्।
अनाधेयविशेषाणां किं कुर्वाण: प्रयोजक:।।297।।
प्रयोगो यद्यभिव्यक्ति: सा प्रागेव निराकृता।
व्यक्तिश्च बुद्धि: सा यस्मात् स फलैर्यदि युज्यते।।298।।
स्याच्छ्रोतु: फलसम्बन्धो वक्ता हि व्यक्तिकारणम्।
अनभिव्यक्तशब्दानां करणानां प्रयोजनम्।।299।।
मनोजपो वा व्यर्थ: स्याच्छब्दो हि श्रोत्रगोचर:।
पारम्पर्येण तज्जत्वात् तद्व्यक्ति: सापि चेन्मति:।।।300।।
तेऽपि तथा स्युस्तदर्था चेदसिद्धं कल्पनान्वयात्।
स्वसामान्यस्वभावानामेकभावविवक्षया।।301।।
उक्ते: समयकाराणामविरोधो न वस्तुनि।
आनुपूर्व्यामसत्यां स्यात् सरो रस इति श्रुतौ।।302।।
न कार्यभेद इति चेद् ? अस्ति सा पुरुषाश्रया।
यो यद्वर्णसमुत्थानज्ञानजाज्ज्ञानतो ध्वनि:।।303।।
जायते, तदुपाधि: स श्रुत्या समवसीयते।
तज्ज्ञानजनितज्ञान: स श्रुतावपटुश्रुति:।।304।।
अपेक्ष्य तत्स्मृतिं पश्चात्* स्मृतिमाधत्त आत्मनि*।
इत्येषा पौरुषेय्येव तद्धेतुग्राहिचेतसाम्।।305।।(पा0टि0-*पश्चादाधत्ते स्मृतिमास्मनि-इत्येवमपि पाठ:)
कार्यकारणता वर्णेष्वानुपूर्वीति* कथ्यते। (पा.टि.-*वर्णे ह्यनुपूर्वीति-रा0)
अन्यदेव ततो रूपं तद्वर्णानां पदे* पदे*।।306।।(पा.टि.-*पदं पदम्-पाठा.)
कर्तृसंस्कारतो भिन्नं सहितं कार्यभेदकृत्।
सा चानुपूर्वी वर्णानां प्रवृत्ता* रचनाकृत:*।।307।। (पा0टि0- *तद्धेतुग्राहिचेतसाम्-रा0)
इच्छाऽविरुद्धसिद्धीनां स्थितक्रमविरोधत:।
कार्यकारणतासिद्धे: पुम्भ्यो* वर्णक्रमस्य च।।308।। (पा0टि0- *पुंसां-पाठा0)
सर्वो वर्णक्रम: पुम्भ्यो दहनेन्धनयुक्तिवत्।

असाधारणता सिद्धा मन्त्राख्यक्रमकारिणाम्*।।309।।(पा0टि0- *पुंसां च क्रमकारिणाम। अतो-रा0)
पुंसां* ज्ञानप्रभावाभ्यामन्येषां तदभावत:।
येऽपि तन्त्रविद: केचिद् मन्त्रान् काँश्चन कुर्वते।।310।। (पा.टि.-*पुंसां च मकारिणाम्। अतो-रा.)
प्रभो: * प्रभावस्तेषां* स तदुक्तन्यायवृत्तित:।
कृतका: पौरुषेयाश्च मन्त्रा वाच्या: फलेप्सुना।।311।। (पा0टि0- *प्रभुप्रभाव0-पाठा0।)
अशसक्तिसाधनं पुंसामनेनैव निराकृतम्।
बुद्धीन्द्रियोक्तिपुंस्त्वादिसाधनं यत्तु वर्ण्यते।।312।।
प्रमाणाभं यथार्थास्ति न हि शेषवतो गति:।
अर्थोऽयं नायमर्थो न* इति शब्दा वदन्ति न।।313।।(पा0टि0-*अयमर्थे नायमर्थ-पाठा0।)
कल्प्योऽयमर्थ: पुरुषैस्ते च रागादिसंयुता:।
तत्रैकस्तत्त्ववविन्नान्य* इति भेदश्च किंकृत:।।314।। (पा0टि0- *स एकस्तव0—रा0।)
तद्वत् पुंस्त्वे कथमपि ज्ञानी कश्चित् कथं न व:।
यस्य* प्रमाणविसंवादि* वचनं सोऽर्थविद् यदि।।315।।(पा0टि0-*प्रमाणमविसंवादि-रा0।)
न ह्यत्यन्तपरोक्षेषु प्रमाणस्यास्ति सम्भव:।
यस्य प्रमाणसंवादि वचनं तत्कृतं वच:।।316।।
स आगम इति प्राप्तं निरर्थाऽपौरुषेयता।
यद्यत्यन्तपरोक्षेऽर्थेऽनागमज्ञानसम्भव:।।317।।
अतीन्द्रियार्थवित् कश्चिदस्तीत्यभिमतं भवेत्।
स्वयं रागादिमान्नार्थं वेत्ति वेदस्य नान्यत:।।318।।
न वेदयति वेदोऽपि वेदार्थस्य कुतो गति:।
तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ।।319।।
खादेत् श्वमांसमित्येव नार्थ इत्यत्र का प्रमा।
प्रसिद्धो लोकवादश्चेत् तत्र कोऽतीन्द्रियार्थदृक्।।320।।
अनेकार्थेषु शब्देषु येनार्थोऽयं विवेचित:।
स्वर्गोर्वश्यादिशब्दश्च दृष्टोरूढार्थवाचक:।।321।।
शब्दान्तरेषु तादृक्षु तादृश्येवास्तु कल्पना।
प्रसिद्धिश्च* नृणां वाद: प्रमाणं स च नेष्यते।।322।। (पा0टि0-*प्रसिद्धश्च-रा0।)
ततश्च भूयोऽर्थगति: किमेतद् द्विष्ठकामितम्।
अथ प्रसिद्धिमुल्लंघ्य कल्पने न निबन्धनम्।।323।।
प्रसिद्धेरप्रमाणत्वात् तद्ग्रहे किं निबन्धमम्।
उत्पादिता प्रसिद्ध्यैव शंका शब्दार्थनिश्चये।।324।।
यस्मान्नानार्थवृत्तित्वं शब्दानां तत्र दृश्यते।

अन्यथासम्भवाभावात् नानाशक्ते: स्वयं ध्वने:।।325।।
अवश्यं शंकया भाव्यं नियामकमपश्यताम्।
एष स्थाणुरयं मार्ग इति वक्तीति कश्चन।।326।।
अन्य: स्वयं ब्रवीमीति तयोर्भेद: परीक्ष्यताम्।
सर्वत्र योग्यस्यैकार्थद्योतने नियम: कुत:।।327।।
ज्ञाता वातीन्द्रिया: केन विवक्षावचनाद् ऋते।
विवक्षानियमे हेतु: संकेतस्तत्प्रकाशन:।।328।।
अपौरुषेये सा नास्ति तस्य सैकार्थता कुत:!
स्वभावनियमेऽन्यत्र न योज्येत तया पुन:।।329।।
संकेतश्च निरर्थ: स्याद् व्यक्तौ च नियम: कुत:!
यत्र स्वातन्त्र्यमिच्छाया नियमो नाम तत्र क:।।330।।
द्योतयेत् तेन संकेतो नेष्टामेवास्य योग्यताम्।

{जैमिनीयमतनिरास:}

यस्मात् किलेदृशं सत्यं यथाग्नि: शीतनोदन:।।331।।
वाक्यं वेदैकदेशत्वादन्यदप्यपरोऽब्रवीत्।
रसवत् तुल्यरूपत्वादेकभाण्डे च पाकवत्।।332।।
शेषवद् व्यभिचारित्वात् क्षिप्तं न्यायविदेदृशम्।
नित्यस्य पुंस: कर्तृत्वं नित्यान् भावानतीन्द्रियान्।।333।।
ऐन्द्रियान् विषमं हेतुं भावानां विषमां स्थितिम्।
निवृत्तिं च प्रमाणाभ्यामन्यद् वा व्यस्तगोचरम्।।334।।
विरुद्धमागमापेक्षेणानुमानेन वा वदत्।
विरोधमसमाधाय शास्त्रार्थं चाप्रदर्श्य स:।।335।।
सत्यार्थं प्रतिजानानो जयेद् धार्ष्ट्येन बन्धकीम्।
सिध्येत् प्रमाणं यद्येवम्, अप्रमाणमथेह किम्।।336।।
न ह्येकं नास्ति सत्यार्थं पुरुषे बहुभाषिणि।
नायं स्वभाव: कार्यं वा वस्तूनां वक्तरि ध्वनि:।।337।।
न च तद्व्यतिरिक्तस्य विद्यतेऽव्यभिचारिता।
प्रवृत्तिर्वाचकानां च वाच्यदृष्टिकृतेति चेत्।।338।।
परस्परविरुद्धार्था कथमेकत्र सा भवेत्।
वस्तुभिर्नागमास्तेन कथञ्चिन्नान्तरीयका:।।339।।
प्रतिपत्तुर्न सिध्यन्ति कुतस्तेभ्योऽर्थनिश्चय:!।
तस्मान्न तन्निवृत्त्यापि भावाभाव: प्रसिध्यति।।340।।

तेनासन्निश्चयफलाऽनुपलब्धिर्न सिध्यति।

परार्थानुमाननामा
चतुर्थ: परिच्छेद:

{आचार्यदिङ्नागसम्मते परार्थानुमानलक्षणे स्वदृष्टग्रहणफलम्}

परस्य प्रतिपाद्यत्वात् अदृष्टोऽपि स्वयं परै:।
दृष्टसाधनमित्येके तत्क्षेपायात्मदृग्वच:।। 1।।
अनुमाविषये नेष्टं परीक्षितपरिग्रहात्।
वाच: प्रामाण्यमस्मिन् हि नानुमानं प्रवर्तते।।2।।
बाधनायागमस्योक्ते: साधनस्य परं प्रति।
सोऽप्रमाणं तदाऽसिद्धं तत्सिद्धमखिलं तत:।।3।।
तदागमवत: सिद्धं यदि कस्य क आगम:।
बाध्यमान: प्रमाणेन स सिद्ध: कथमागम:।।4।।
तद्विरुद्धाभ्युपगमस्तेनैव च कथं भवेत्!।
तदन्योपगमे तस्य त्यागांगस्याप्रमाणता।।5।।
तत् कस्मात् साधनं नोक्तं स्वप्रतीतिर्यदुद्भवा।
युक्त्या ययागमो ग्राह्य: परस्यापि च सा न किम्।।6।।
प्राकृतस्य सत: प्राग् यै: प्रतिपत्त यक्षसम्भवौ।
साधनै: साधनान्यर्थशक्तिज्ञानेऽस्य तान्यलम्।।7।।
विच्छिन्नानुगमा येऽपि सामान्येनाप्यगोचरा:।
साध्यसाधनचिन्तास्ति न तेष्वर्थेषु काचन।।8।।
पुंसामभिप्रायवशात् तत्त वातत्त वव्यवस्थितौ।
लुप्तौ हेतुतदाभासौ तस्य वस्त्वसमाश्रयात्।।9।।
सन्नर्थो ज्ञानसापेक्षो नासन् ज्ञानेन साधक:।
सतोऽपि वस्त्वसंश्लिष्टाऽसंगत्या सदृशी गति:।। 10।।
लिङ्गं स्वभाव: कार्यं वा दृश्यादर्शनमेव वा।
सम्बद्धं वस्तुतस्सिद्धं तदसिद्धं किमात्मन:।। 11।।
परेणाप्यन्यतो गन्तुमयुक्तम्; परकल्पितै:।
प्रसङ्गो द्वयसम्बन्धादेकापायेऽन्यहानये।। 12।।

{अर्थग्रहणफलम्}

तदर्थग्रहणं शब्दकल्पनारोपितात्मनाम्।
अलिङ्गत्वप्रसिद्ध्यर्थमर्थादर्थस्य सिद्धित:।।13।।
कल्पनागमयो: कर्तुरिच्छामात्रानुवृत्तित:।

वस्तुनश्चान्यथाभावात् तत्कृता व्यभिचारिण:।।14।।

{पक्षविचार:}

अर्थादर्थगते: शक्ति: पक्षहेत्वभिधानयो:।
नार्थे तेन तयोर्नास्ति स्वत: साधनसंस्थिति:।।15।।
तत् पक्षवचनं वक्तुरभिप्रायनिवेदने।
प्रमाणं संशयोत्पत्तेस्तत: साक्षान्न साधनम्।।16।।
साध्यस्यैवाभिधानेन पारम्पर्येण नाप्यलम्।
शक्तस्य सूचकं हेतुवचोऽशक्तमपि स्वयम्।।17।।
हेत्वर्थविषयत्वेन तदशक्तोक्तिरीरिता।
शक्तिस्तस्यापि चेद्धेतुवचनस्य प्रवर्त्तनात्।।18।।
तत्संशयेन जिज्ञासोर्भवेत् प्रकरणाश्रय:।
विपक्षोपगमेऽप्येतत् तुल्यमित्यनवस्थिति:।।19।।
अन्तरङ्गं तु सामर्थ्यं त्रिषु रूपेषु संस्थितम्।
तत्र स्मृतिसमाधानं तद्वचस्येव संस्थितम्।।20।।
अख्यापिते हि विषये हेतुवृत्तेरसम्भवात्।
विषयख्यापनादेव सिद्धौ चेत् तस्य शक्तता।।21।।
उक्तमत्र; विनाप्यस्मात् कृतक: शब्द ईदृशा:।
सर्वेऽनित्या इति प्रोक्तेऽप्यर्थात् तन्नाशधीर्भवेत्।।22।।
अनुक्तावपि पक्षस्य सिद्धेरप्रतिबन्धत:।
त्रिष्वन्यतमरूपस्यैवानुक्तिर्न्यूनतोदिता।।23।।
साध्योक्तिं वा प्रतिज्ञां स वदन् दोषैर्न युज्यते।
साधनाधिकृतेरेव हेत्वाभासाप्रसङ्गत:।।24।।
अविशेषोक्तिरप्येकजातीये संशयावहा।
अन्यथा सर्वसाध्योक्ते: प्रतिज्ञात्वं प्रसज्यते।।25।।
सिद्धोक्ते: साधनत्वाच्च परस्यापि न दुष्यति।
इदानीं साध्यनिर्देश: साधनावयव: कथम्!।।26।।
साभासोक्त्याद्युपक्षेपपरिहारविडम्बना।
असम्बद्धा तथा हृयेष न न्याय्य इति वर्णितम्*।।27।। पा0टि0- *सूचितं-रा0।)
गम्यार्थत्वेऽपि साध्योक्तेरसम्मोहाय लक्षणम्।
तच्चतुर्लक्षणं रूपनिपातेषु स्वयं-पदै:।।28।।
असिद्धासाधनार्थोक्तवाद्यभ्युपगतग्रह: *।
अनुक्तोऽपीच्छया व्याप्त: साध्य आत्मार्थवन्मत:।।29।। (पा0टि0- *भ्युपगमग्रह:-पाठ0)

सर्वान्येष्टनिवृत्तावप्याशङ्कास्थानवारणम्।
वृत्तौ स्वयं-श्रुतेनाह कृता चैषा तदर्थिका।।30।।
विशेषस्तद्व्यपेक्षत्वात् कथितो धर्मधर्मिणो:।
अनुक्तावपि वाञ्छाया भवेत् प्रकरणाद् गति:।।31।।
अनन्वयोऽपि दृष्टान्ते दोषस्तस्य यथोदितम्।
'आत्मा परश्चेत् सोऽसिद्ध:' इति तत्रेष्टघातकृत्।।32।।
साधनं यद्विवादे न न्यस्तं तच्चेन्न साध्यते।
किं साध्यमन्यथानिष्टं भवेद् वैफल्यमेव वा।।33।।
सद्वितीयप्रयोगेषु निरन्वयविरुद्धते।
एतेन कथिते; साध्यं सामान्येनाथ सम्मतम्।।34।।
तदेवार्थान्तराभावाद् देहानाप्तौ न सिध्यति।
वाच्यशून्यं प्रलपतां तदेतज्जाड्यवर्णितम्।।35।।
तुल्यं नाशेऽपि चेच्छब्दघटभेदेन कल्पने।
न सिद्धेन विनाशेन तद्वत: साधनाद् ध्वने:।।36।।
तथार्थान्तरभावे स्यात् तद्वान् कुम्भोऽप्यनित्यता।
विशिष्टा ध्वनिनान्वेति नो चेन्नायोगवारणात्।।37।।
द्विविधो हि व्यवच्छेदो वियोगापरयोगयो:।
व्यवच्छेदादयोगे तु वार्ये नानन्वयागम:।।38।।
सामान्यमेव तत्साध्यं न च सिद्धप्रसाधनम्।
विशिष्टं धर्मिणा तच्च न निरन्वयदोषवत्।।39।।
एतेन धर्मिधर्माभ्यां विशिष्टौ धर्मधर्मिणौ।
प्रत्याख्यातौ निराकुर्वन् धर्मिण्येवमसाधनात्।।40।।
समुदायापवादो हि न धर्मिणि विरुध्यते।
साध्यं यतस्तथा नेष्टं साध्यो धर्मोऽत्र केवल:।।41।।

{स्वयंशब्दग्रहणप्रयोजनम्}

एकस्य धर्मिण: शास्त्रे नानाधर्मस्थितावपि।
साध्य: स्यादात्मनैवेष्ट इत्युपात्ता स्वयं-श्रुति:।।42।।
शास्त्राभ्युपगमादेव सर्वादानात् प्रबाधने।
तत्रैकस्यापि दोष: स्याद् यदि हेतुप्रतिज्ञयो:।।43।।
शब्दनाशे प्रसाध्ये स्याद् गन्धभूगुणताक्षते:।
हेतुर्विरुद्धोऽप्रकृतेर्नो चेदन्यत्र सा समा।।44।।

अथात्र धर्मी प्रकृतस्तत्र शास्त्रार्थबाधनम्।
अथ वादीष्टतां ब्रूयाद् धर्मिधर्मादिसाधनै:।।45।।
कैश्चित् प्रकरणैरिच्छा भवेत् सा गम्यते च तै:।
बलात् तवेच्छेयमिति व्यक्तमीश्वरचेष्टितम्।।46।।
वदन्नकार्यलिङ्गां तां व्यभिचारेण बाध्यते।
अनान्तरीयके चार्थे बाधितेऽन्यस्य का क्षति:।।47।।

{शब्दाप्रामाण्यविचार:}

उक्तं च नागमापेक्षमनुमानं स्वगोचरे।
सिद्धं तेन सुसिद्धं तन्न तदा शास्त्रमीक्ष्यते।।48।।
वादत्यागस्तदा स्याच्चेन्न तदानभ्युपायत:।
उपायो ह्यभ्युपायेऽयमनङ्गं स तदापि सन्।।49।।
तदा विशुद्धे विषयद्वये शास्त्रपरिग्रहम्।
चिकीर्षो: स हि काल: स्यात् तदा शास्त्रेण बाधनम्।।50।।
तद्विरोधेन चिन्तायास्तत्सिद्धार्थैष्वयोगत:।
तृतीयस्थानसांक्रान्तौ न्याय्य: शास्त्रपरिग्रह:।।51।।
तत्रापि साध्यधर्मस्य नान्तरीयकबाधनम्।
परिहार्यं न चान्येषामनवस्थाप्रसङ्गत:।।52।।
केनेयं सर्वचिन्तासु शास्त्रं ग्राह्यमिति स्थिति:।
कृतेदानीमसिद्धान्तैर्ग्राह्यो धूमेन नानल:।।53।।
रिक्तस्य जन्तोर्ज्जातस्य गुणदोषमपश्यत:।
विलब्धा बत केनामी सिद्धान्तविषमग्रहा:।।54।।
यदि साधन एकत्र सर्वं शास्त्रं निदर्शने।
दर्शयेत् साधनं स्यादित्येषा लोकोत्तरा स्थिति:।।55।।
असम्बद्धस्य धर्मस्य किमसिद्धौ न सिध्यति।
हेतुस्तत्साधनायोक्त: किं दुष्टस्तत्र सिध्यति।।56।।
धर्मानननुपनीयैव दृष्टान्ते धर्मिणोऽखिलान्।
वाग्धूमादेर्जनोऽन्वेति चैतन्यदहनादिकम्।।57।।
स्वभावं कारणं चार्थोऽव्यभिचारेण साधयन्।
कस्यचिद् वादबाधायां स्वभावान्न निवर्तते।।58।।
प्रपद्यमानश्चान्यस्तं नान्तरीयकमीप्सितै:।
साध्यार्थैर्हेतुना तेन कथमप्रतिपादित:।।59।।

उक्तोऽनुक्तोऽपि वा हेतुर्विरोद्धा वादिनोऽत्र किम्।
न हि तस्योक्तिदोषेण स जात: शास्त्रबाधन:।।60।।
बाधकस्याभिधानाच्चेद् दोषो यदि वदेन्न स:।
किन्न बाधेत सोऽकुर्वन्नयुक्तं केन दुष्यति!।।61।।
अन्येषु हेत्वाभासेषु स्वेष्टस्यैवाप्रसाधनात्।
दुष्येद् व्यर्थाभिधानेन नात्र तस्य प्रसाधनात्।।62।।
यदि किञ्चित क्वचिच्छास्त्रे न युक्तं प्रतिषिध्यते।
ब्रुवाणो युक्तमप्यन्यदिति राजकुलस्थिति:।।63।।
सर्वानर्थान् समीकृत्य वक्तुं शक्यं न साधनम्।
सर्वत्र तेनोत्सन्नेयं साध्यसाधनसंस्थति:।।64।।
विरुद्धयोरेकधर्मिण्ययोगादस्तु बाधनम्।।
विरुद्धैकान्तिके नात्र तद्वदस्ति विरोधिता।।65।।
अबाध्यबाधकत्वेऽपि तयो: शास्त्रार्थविप्लवात्।
असम्बन्धेऽपि बाधा चेत् स्यात् सर्वं सर्वबाधनम्।।66।।
सम्बन्धस्तेन तस्यैव बाधनादस्ति चेदसत्।
हेतो: सर्वस्व चिन्त्यत्वात् स्वसाध्ये गुणदोषयो:।।67।।
नान्तरीयकता साध्ये सम्बन्ध: सेह नेक्ष्यते।
केवलं शास्त्रपीडेति दोष: सान्यकृते समा।।68।।
शास्त्राभ्युपगमात् साध्य: शास्त्रदृष्टोऽखिलो यदि।
प्रतिज्ञाऽसिद्धदृष्टान्तहेतुवाद: प्रसज्यते।।69।।
उक्तयो: साधनत्वेन नो चेदीप्सितवादत:।
न्यायप्राप्तं न साध्यत्वं वचनाद् विनिवर्त्तते।।70।।
अनीप्सितमसाध्यं चेद् वादिनान्योऽप्यनीप्सित:।
धर्मोऽसाध्यस्तदाऽसाध्यं बाधमानं विरोधि किम्।।71।।
पक्षलक्षणबाहयार्थ: स्वयं-शब्दोऽप्यनर्थक:।
शास्त्रेष्विच्छाप्रवृत्त्यर्थो यदि शङ्का कुतोन्वियम्।।72।।
सोऽनिषिद्ध: प्रमाणेन गृहणन् केन निवार्यते।
निषिद्धश्चेत् प्रमाणेन वाचा केन प्रवर्त्त्यते।।73।।
पूर्वमप्येष सिद्धान्तं स्वेच्छयैव गृहीतवान्।
किञ्चिदन्यं स तु पुनर्ग्रहीतुं लभते न किम्।।74।।
दृष्टेर्विप्रतिपत्तीनामत्राकार्षीत् स्वयं-श्रुतिम्।
इष्टाक्षतिमसाध्यत्वमनवस्थां च दर्शयन्।।75।।

समयाहितभेदस्य परिहारेण धर्मिण:।
प्रसिद्धस्य गृहीत्यर्थां जगादान्य: स्वयं-श्रुतिम्।।76।।
विचारप्रस्तुतेरेव प्रसिद्ध: सिद्ध आश्रय:।
स्वेच्छाकल्पितभेदेषु पदार्थेष्वविवादत:।।77।।
असाध्यतामथ प्राह सिद्धादेशेन धर्मिण:।
स्वरूपेणैव निर्देश्य इत्यनेनैव तद् गतम्।।78।।
सिद्धसाधनरूपेण निर्देशस्य हि सम्भवे।
साध्यत्वेनैव निर्देश्य इतीदं फलवद् भवेत्।।79।।
अनुमानस्य सामान्यविषयत्वं च वर्णितम्।
इहैवं न ह्यनुक्तेऽपि किञ्चित् पक्षे विरुध्यते।।80।।
कुर्याच्चेद् धर्मिणं साध्यं तत: किं तन्न शक्यते।
कस्माद्धेत्वन्वयाभावान्न च दोषस्तयोरपि।।81।।
उत्तरावयवापेक्षो न दोष: पक्ष इष्यते।
तथा हेत्वादिदोषोऽपि पक्षदोष: प्रसज्यते।।82।।
सर्वै: पक्षस्य बाधातस्तस्मात् तन्मात्रसङ्गिन:।
पक्षदोषा मता नान्ये प्रत्यक्षादिविरोधवत्।।83।।
हेत्वादिलक्षणैर्बाध्यं मुक्त्वा पक्षस्य लक्षणम्।
उच्यते परिहारार्थमव्याप्तिव्यतिरेकयो:।।84।।
स्वयन्निपातरूपाख्या व्यतिरेकस्य बाधिका:।
सहानिराकृतेनेष्टश्रुतिरव्याप्तिबाधनी।।85।।
साध्याभ्युपगम: पक्षलक्षणं तेष्वपक्षता।
निराकृते बाधनत: शेषेऽलक्षणवृत्तित:।।86।।
स्वयमिष्टाभिधानेन गतार्थेऽप्यवधारणे।
कृत्यान्तेनाभिसम्बन्धादुक्तं कालान्तरच्छिदे।।87।।
इहानङ्गमिषेर्न्निष्ठा तेनेप्सितपदे पुन:।
अङ्गमेव तयाऽसिद्धहेत्वादि प्रतिषिध्यते।।88।।
अवाचकत्वाच्चायुक्तं तेनेष्टं स्वयमात्मना।
अनपेक्ष्याखिलं शास्त्रं तद्वादीष्टस्य साध्यता।।89।।
तेनानभीष्टसंसृष्टस्येष्टस्यापि हि बाधने।
यथा साध्यमबाधात: पक्षहेतू न दुष्यत:।।90।।

{सहानिराकृतग्रहणप्रयोजनम्}

अनिषिद्ध: प्रमाणाभ्यां स चोपगम इष्यते।

सन्दिग्धे हेतुवचनाद् व्यस्तो हेतोरनाश्रय:।।91।।

{बाधायाश्चातुर्विध्यम्}

अनुमानस्य भेदेन सा बाधोक्ता चतुर्विधा।
तत्राभ्युपाय: कार्याङ्गं स्वभावाङ्गं जगत्स्थिति:।।92।।

{आगमस्ववचनयोस्तुल्यबलत्वम्}

आत्मापरोधाभिमतो भूतनिश्चययुक्तवाक्।
आप्त: स्ववचनं शास्त्रं चैकमुक्तं समत्वत:।।93।।
यथात्मनोऽप्रमाणत्वे वचनं न प्रवर्त्तते।
शास्त्रसिद्धे तथा नार्थे विचारस्तदनाश्रये।।94।।
तत्प्रस्तावाश्रयत्वे हि शास्त्रं बाधकमित्यमुम्।
वक्तुमर्थं स्ववाचास्य सहोक्ति: साम्यदृष्टये।।95।।
उदाहरणमप्यत्र सदृशं तेन वर्णितम्*। (पा0टि0-*दर्शितम्-पाठा0।)
प्रमाणानामभावे हि शास्त्रवाचोरयोगत:।।96।।
स्ववाग्विरोधे विस्पष्टमुदाहरणमागमे।
दिङ्मात्रदर्शनम्, तत्र प्रेत्यधर्मोऽसुखप्रद:।।97।।
शास्त्रिणोऽप्यतदालम्बे विरुद्धोक्तौ तु वस्तुनि।
न बाधा प्रतिबन्ध: स्यात् तुल्यकक्षतया तयो:।।98।।
यथा स्ववाचि तच्चास्य तदा स्ववचनात्मकम्।
तयो: प्रमाणं यस्यास्ति तत् स्यादन्यस्य बाधकम्।।99।।
प्रतिज्ञामनुमानं वा प्रतिज्ञाऽपेतयुक्तिका।
तुल्यकक्षा यथार्थं वा बाधेत कथमन्यथा।। 100।।
प्रामाण्यमागमानां च प्रागेव विनिवारितम्।
अभ्युपायविचारेषु तस्माद् दोषोऽयमिष्यते।। 101।।
तस्माद् विषयभेदस्य दर्शनार्थं पृथक् कृत:।
अनुमानाबहिर्भूतोऽप्यभ्युपाय: प्रबाधनात्।।102।।
अन्यथाऽतिप्रसङ्ग: स्याद् व्यर्थता वा पृथक्कृते:।
भेदो वाङ्मात्रवचने प्रतिबन्ध: स्ववाच्यपि।।103।।
तेनाभ्युपगमाच्छास्त्रं प्रमाणं सर्ववस्तुषु।
बाधकम्, यदि नेच्छेत् स बाधकं किं पुनर्भवेत्।।104।।
स्ववाग्विरोधेऽभेद: स्यात् स्ववाक्शास्त्रविरोधयो:।
पुरुषेच्छाकृता चास्य परिपूर्णा प्रमाणता।।105।।
तस्मात् प्रसिद्धेष्वर्थेषु शास्त्रत्यागेऽपि न क्षति:।

परोक्षेष्वागमानिष्टौ न चिन्तैव प्रवर्त्तते।।106।।
विरोधोद्भावनप्राया परीक्षाप्यत्र तद्यथा।
अधर्ममूलं रागादि स्नानं चाधर्मनाशनम्।।107।।
शास्त्रं यत्सिद्धया युक्त्या स्ववाचा च न बाध्यते।
दृष्टेऽदृष्टेऽपि तद् ग्राह्यमिति चिन्ता प्रवर्त्त्यते*।।108।। (पा0टि0- *प्रवर्तते–पाठा0।)

{प्रतीतिबाधा}

अर्थेष्वप्रतिषिद्धत्वात् पुरुषेच्छानुरोधिन:।
इष्टशब्दाभिधेयस्याप्तोऽत्राक्षतवाग् जन:।।109।।
उक्त: प्रसिद्धशब्देन धर्मस्तद्व्यवहारज:।
प्रत्यक्षादिमिता मानश्रुत्यारोपेण सूचिता:।।110।।
तदाश्रयभुवामिच्छानुरोधादनिषेधिनाम्।
कृतानामकृतानां च योग्यं विश्वं स्वभावत:।।111।।
अर्थमात्रानुरोधिन्या भाविन्या भूतयापि वा।
बाध्यते प्रतिरुन्धान: शब्दयोग्यतया तया।112।।
तद्योग्यताबलादेव वस्तुतो घटितो ध्वनि:।
सर्वोऽस्यामप्रतीतेऽपि तस्मिंस्तत्सिद्धता तत:।।113।।
असाधारणता न स्यात् बाधाहेतोरिहान्यथा।
तन्निषेधोऽनुमानात् स्याच्छब्दार्थेऽनक्षवृत्तित:।।114।।
असाधारणता तत्र हेतूनां यत्र नान्वयि।
सत्त्वमित्यप्युदाहारो हेतोरेवं कुतो मत:।।115।।
संकेतसंश्रया: शब्दा: स चेच्छामात्रसंश्रय:।
नासिद्धि: शब्दसिद्धानामिति शाब्दप्रसिद्धिवाक्।।116।।
अनुमानप्रसिद्धेषु विरुद्धाव्यभिचारिण:।
अभावं दर्शयत्येवं प्रतीतेरनुमात्वत:।।117।।
अथ वा ब्रुवतो लोकस्यानुमाऽभाव उच्यते।
किं तेन भिन्नविषया प्रतीतिरनुमानत:।।118।।
तेनानुमानाद् वस्तूनां सदसत्तानुरोधिन:।
भिन्नस्यातद्वशा वृत्तिस्तदिच्छाजेति सूचितम्।।119।।
चन्द्रतां शशिनोऽनिच्छन् कां प्रतीतिं स वाञ्छति।
इति तं प्रत्यदृष्टान्तं तदसाधारणं मतम्।।120।।
नोदाहरणमेवैकमधिकृत्येदमुच्यते।
लक्षणत्वात् तथा वृक्षोऽधात्रीत्युक्तौ च बाधनात्।।121।।

अत्रापि लोके दृष्टत्वात् कर्पूररजतादिषु।
समयाद् वर्तमानस्य काऽसाधारणतापि वा।।122।।
यदि तस्य क्वचित् सिध्येत् सिद्धं वस्तुबलेन तत्।
प्रतीतिसिद्धोपगमेऽशशिन्यप्यनिवारणम्।।123।।
तस्य वस्तुनि सिद्धस्य शशिन्यप्यनिवारणम्।
तद्वस्त्वभावे शशिनि वारणेऽपि न दुष्यति।।1224।।
तस्मादवस्तुनियतसंकेतबलभाविनाम्।
योग्या: पदार्था धर्माणामिच्छाया अनिरोधनात्।।125।।
तां योग्यतां विरुन्धानं संकेताप्रतिषेधजा।
प्रतिहन्ति प्रतीत्याख्या योग्यताविषयेऽनुमा।।126।।
शब्दानामर्थनियम: संकेतानुविधायिनाम्।
नेत्यनेनोक्तमत्रैषां प्रतिषेधो विरुध्यते।।127।।
नैमित्तिक्या: श्रुतेरर्थमर्थं वा पारमार्थिकम्।
शब्दानां प्रतिरुन्धानोऽबाधनार्हो हि वर्णित:।।128।।
तस्माद् विषयभेदस्य दर्शनाय पृथक्कृता।
अनुमानाबहिर्भूता प्रतीतिरपि पूर्ववत्।।129।।
सिद्धयो: पृथगाख्याने दर्शयँश्च प्रयोजनम्।
एते सहेतुके प्राह नानुमाध्यक्षबाधने।।130।।

{प्रत्यक्षबाधा}

अत्राप्यध्यक्षबाधायां नानारूपतया ध्वनौ।
प्रसिद्धस्य श्रुतौ; रूपं यदेव प्रतिभासते।।131।।
अद्वयं शबलाभासस्यादृष्टेर्बुद्धिजन्मन:।
तदर्थार्थोक्तिरस्यैव क्षेपेऽध्यक्षेण बाधनम्।।132।।

{सामान्यविचार:}

तदेव रूपं तत्रार्थ: शेषं व्यावृत्तिलक्षणम्।
अवस्तुभूतं सामान्यमतस्तन्नाक्षगोचर:।।133।।
तेन सामान्यधर्माणामप्रत्यक्षत्वसिद्धित:।
प्रतिक्षेपेऽप्यबाधेति श्रावणोक्त्या प्रकाशितम्।।134।।
सर्वथाऽवाच्यरूपत्वात् सिद्ध्या तस्य समाश्रयात्।
बाधनात् तद्बलेनोक्त: श्रावणेनाक्षगोचर:।।135।।
सर्वत्र वादिनो धर्मो य: स्वसाध्यतयेप्सित:।
तद्धर्मवति बाधा स्नान्नान्यधर्मेण धर्मिणि।।136।।

अन्यथास्योपरोध: को बाधितेऽन्यत्र धर्मिणि।
गतार्थे लक्षणेनास्मिन् स्वधर्मिवचनं पुन:।।137।।
बाधायां धर्मिणोऽपि स्याद् बाधेत्यस्य प्रसिद्धये।
आश्रयस्य विरोधेन तदाश्रितविरोधनात्।।138।।
अन्यथैवंविधो धर्म: साध्य इत्यभिधानत:।
तद्बाधामेव मन्येत स्वधर्मिग्रहणं तत:।।139।।
नन्वेतदप्यर्थसिद्धं सत्यं केचित्तु धर्मिण:।
केवलस्योपरोधेऽपि दोषवत्तामुपागता:।।140।।
यथा परैरनुत्पाद्यापूर्वरूपं न खादिकम्।
सकृच्छब्दाद्यहेतुत्वादित्युक्ते प्राह दूषक:।।141।।
तद्वद् वस्तुस्वभावोऽसन् धर्मी व्योमादिरित्यपि।
नेवमिष्टस्य साध्यस्य बाधा काचन विद्यते।।142।।
द्वयस्यापि हि साध्यत्वे साध्यधर्मोपरोधि यत्।
बाधनं धर्मिणस्तत्र बाधेत्येतेन वर्णितम्।।143।।
तथैव धर्मिणोऽप्यत्र साध्यत्वात् केवलस्य न।
यद्येवमत्र बाधा स्यात्; नान्यानुत्पाद्यशक्तिक:।।144।।
सकृच्छब्दाद्यहेतुत्वात् सुखादिरिति पूर्ववत्।
विरोधिता भवेदत्र हेतुरैकान्तिको यदि।।145।।
क्रमक्रियाऽनित्यतयोरविरोधाद् विपक्षत:।
व्यावृत्ते: संशयान्नायं शेषवद् भेद इष्यते।।146।।
स्वयमिष्टो यतो धर्म: साध्यस्तस्मात् तदाश्रय:।
बाध्यो न केवलो नान्यसंश्रयो वेति सूचितम्।।147।।
स्वयं-श्रुत्यान्यधर्माणां बाधाऽबाधेति कथ्यते।
तथा स्वधर्मिणान्यस्य धर्मिणोऽपीति कथ्यते।।148।।

{पक्षदोषविचार:}

{हेतुनिरपेक्ष: पक्षदोष:}

सर्वसाधनदोषेण पक्ष एवोपरुध्यते।
तथापि पक्षदोषत्वं प्रतिज्ञामात्रभाविन:।।149।।
उत्तरावयवापेक्षो यो दोष: सोऽनुबध्यते।
तेनेत्युक्तमतोऽपक्षदोषोऽसिद्धाश्रयादिक:।।150।।
धर्मिधर्मविशेषाणां स्वरूपस्य च धर्मिण:।
बाधा साध्याङ्गभूतानामनेनैवोपदर्शिता।।151।।

{अवयविनिरास:}

तत्रोदाहृयतिदिङ्मात्रमुच्यतेऽर्थस्य दृष्टये।
द्रव्यलक्षणयुक्तोऽन्य: संयोगेऽर्थोऽस्ति दृष्टि भाक्।।152।।
अदृश्यस्य विशिष्टस्य प्रतिज्ञा निष्प्रयोजना।
इष्टो हृयवयवी कार्य दृष्ट्वाऽदृश्येष्वसम्भवि।।153।।
अविशिष्टस्य चान्यस्य साधने सिद्धसाधनम्।
गुरुत्वाधोगती स्यातां यद्यस्य स्यात् तुलानति:।।154।।
तन्निर्गुणक्रियस्तस्मात् समवायि न कारणम्।
तत एव न दृश्योऽसावदृष्टे: कार्यरूपयो:।।155।।
तद्बाधान्यविशेषस्य नान्तरीकभाविन:।
आसूक्ष्माद् द्रव्यमालायास्तोल्यत्वादंशुपातवत्।।156।।
द्रव्यान्तरगुरुत्वस्य गतिर्नेत्यपरोऽब्रवीत्।
तस्य क्रमेण संयुक्ते पांशुराशौ सकृद् युते।।157।।
भेद: स्याद् गौरवे तस्मात् पृथक् सह च तोलिते।
सुवर्णमाषकादीनां* संख्यासाम्यं न युज्यते।।158।।(पा0टि0-*क्रमेण माषकादीनां-पाठा0।)
सर्षपाता महाराशेरुत्तरोत्तरवृद्धिमत्।
गौरवं कार्यमालाया यदि नैवोपलभ्यते।।159।।
आ सर्षपाद् गौरवं तु दुर्लक्षितमनल्पकम्।
तुल्यं तत्कारणं कार्यगौरवानुपलक्षणात्।।160।।
नन्वदृष्टोंऽशुवत् सोऽर्थो न च तत्कार्यमीक्ष्यते।
गुरुत्वागतिवत् सर्वतद्गुणानुपलक्षणात्।।161।।
माषकादेरनाधिक्यम्; अनति: सोपलक्षणम्।
यथास्वमक्षेणादृष्टे रूपादावधिकाधिके।।162।।
अभ्युपाय: स्ववागाद्यबाधाया: सम्भवेन तु।
उदाहरणमप्यन्यदिशा गम्यं यथोक्तया।।163।।

{नैयायिकपक्षलक्षणे दोष:}

त्रिकालविषयत्वात् तु कृत्यनामतथात्मकम्।
तथा परं प्रति न्यस्तं साध्यं नेष्टं तदापि तत्।।164।।
प्रत्ययनाधिकारे तु सर्वासिद्धावरोधिनी।
यस्मात् साध्यश्रुतिर्नेष्टं विशेषमवलम्बते।।165।।
तेनाप्रसिद्धदृष्टान्तहेतूदाहरणं कृतम्।

अन्यथा शशशृङ्गादौ सर्वासिद्धेऽपि साध्यता।।166।।
सर्वस्य चाप्रसिद्धत्वात् कथञ्चित् तेन न क्षमा:।
कर्मादिभेदोपक्षेपपरिहारविवेचने।।167।।
प्रागसिद्धस्वभावत्वात् साध्योऽवयव इत्यसत्।
तुल्या सिद्धान्तता, ते हि येनोपगमलक्षणा:।।168।।
समुदायस्य साध्यत्वेऽप्यन्योन्यस्य विशेषणम्।
साध्यं द्वयं तदाऽसिद्धं हेतुदृष्टान्तलक्षणम्।।169।।
असम्भवात् साध्यशब्दो धर्मिवृत्तिर्यदीष्यते।
शास्त्रेणालं यथायोगं लोक एव प्रवर्त्तताम्।।170।।
साधनाख्यानसामर्थ्यात् तदर्थे साध्यता मता।
हेत्वादिवचनैर्व्याप्तेरनाशंक्यं च साधनम्।।171।।

{प्रतिज्ञालक्षणे दोष:}

पूर्वावधारणे तेन प्रतिज्ञालक्षणाभिधा।
व्यर्था व्याप्तिफला सोक्ति: सामर्थ्याद् गम्यते तत:।।172।।
विरुद्धतेष्टासम्बन्धोऽनुपकारसहास्थितो।
एवं सर्वाङ्गदोषाणां प्रतिज्ञादोषता भवेत्।।173।।
पक्षदोष: परापक्षो नेति च प्रतिपादितम्।
इष्टासम्भव्यसिद्धश्च स एव स्यान्निराकृत:।।174।।
अनित्यत्वसहेतुत्वे शब्द एवं प्रकीर्त्तयेत्।
दृष्टान्ताख्यानतोऽन्यत् किमस्त्यत्रार्थानुदर्शनम्।।175।।

{सामान्यचिन्ता}

विशेषभिन्नमाख्याय सामान्यस्यानुवर्त्तने।
न तद्व्याप्ति: फलं वा किं सामान्येनानुवर्त्तने।। 176 ।।
स्यान्निराकरणं शब्दे स्थितेनैवेत्यतोऽब्रवीत्।
विरुद्धविषयेऽन्यस्मिन् वदन्नाहान्यतां श्रुते:।। 177 ।।
स च भेदोऽप्रतिक्षेपात् समान्यानां न विद्यते।
वृक्षो न शिशपैवेति यथा प्रकरणे क्वचित्।।178।।
सर्वश्रुतेरेकवृत्तिनिषेध: स्यान्न चेयता।
सोऽसर्व: सर्वभेदानामतत्त्वे तदसम्भवात्।।179।।
ज्ञाप्यज्ञापकयोर्भेदात् धर्मिणो हेतुभाविन:।
असिद्धेर्ज्ञापकत्वस्य* धर्म्यसिद्ध: स्वसाधने।।180।। (पा0टि0-*र्ज्ञापिकत्वस्य-रा0)
धर्मधर्मिविवेकस्य सर्वभावेष्वसिद्धित:।

सर्वत्र दोषस्तुल्यश्चेन्न संवृत्या विशेषत:।।181।।
परमार्थविचारेषु तथाभूताप्रसिद्धित:।
तत्त्वान्यत्वं पदार्थेषु सांवृतेषु निषिध्यते।।182।।
अनुमानानुमेयार्थव्यवहारस्थितिस्त्वियम्।
भेदं प्रत्ययसंसिद्धमवलम्ब्य च कल्प्यते।।183।।
यथास्वं भेदनिष्ठेषु प्रत्ययेषु विवेकिन:।
धर्मी धर्माश्च भासन्ते व्यवहारस्तदाश्रय:।।184।।
व्यवहारोपनीतोऽत्र स एवाश्लिष्टभेदधी:।
साध्य: साधनतां नीतस्तेनासिद्ध: प्रकाशित:।।185।।
भेदसामान्ययोर्धर्मभेदादंगांगिता तत:।
यथाऽनित्य: प्रयत्नोत्थ: प्रयत्नोत्थतया ध्वनि:।।186।।
पक्षाङ्गत्वेऽप्यबाधत्वान्नासिद्धिर्भिन्नधर्मिणि।
यथाश्वो न विषाणित्वादेष पिण्डो विषाणवान्।।187।।
साध्यकालांगता वा न निवृत्तेरुपलक्ष्य तत्।
विशेषोऽपि प्रतिज्ञार्थो धर्मभेदान्न युज्यते।।188।।

{हेतुलक्षणविचार:}

{हेतुलक्षणम्}

पक्षधर्मप्रभेदेन सुखग्रहणसिद्धये।
हेतुप्रकरणार्थस्य सूत्रसंक्षेप उच्यते।।189।।
अयोगं योगमपरैरत्यन्तायोगमेव च।
व्यवच्छिनत्ति धर्मस्य निपातो व्यतिरेचक:।।190।।
विशेषणविशेषाभ्यां क्रियया च सहोदित:।
विवक्षातोऽप्रयोगेऽपि सर्वोऽर्थोऽयं प्रतीयते।।191।।
व्यवच्छेदफलं वाक्यं यतश्चैत्रो धनुर्धर:।
पार्थो धनुर्धरो नीलं सरोजमिति वा यथा।।192।।
प्रतियोगिव्यवच्छेदस्तत्राप्यर्थेषु गम्यते।
तथा प्रसिद्धे: सामर्थ्याद् विवक्षानुगमाद् ध्वने:।।193।।
तदयोगव्यवच्छेदाद् धर्मी धर्मविशेषणम्।
तद्विशिष्टतया धर्मो न निरन्वयदोषभाक्।।194।।

{हेतुभेदा:}

स्वभावकार्यसिद्ध्यर्थं द्वौ द्वौ हेतुविपर्ययौ।
विवादाद् भेदसामान्ये शेषो व्यावृत्तिसाधन:।।195।।

न हि स्वभावादन्येन व्याप्तिर्गम्यस्य कारणे।
सम्भवाद् व्यभिचारस्य द्विधावृतिफलं ततः।।196।।
प्रयत्नानन्तरं ज्ञानं प्राक् सतो नियमेन न।
तस्यावृत्यक्षशब्देषु सर्वथाऽनुपयोगतः।।197।।
कदाचिन्निरपेक्षस्य कार्याऽकृतिविरोधतः।
कादाचित्कफलं सिद्धं तल्लिङ्गं ज्ञानमीदृशम्।।198।।

{कार्यस्वभावप्रभेदनिर्देशफलम्:}

एतावतैव सिद्धेऽपि स्वभावस्य पृथक् कृतिः।
कार्येण सह निर्देशे मा ज्ञासीत् सर्वमीदृशम्।।199।।
व्युत्पत्त्यर्था च हेतूक्तिरुक्तार्थानुमितौ कृता।
अत्र प्रभेद आख्यातः लक्षणं तु न भिद्यते।।200।।
तेनात्र कार्यलिङ्गेन स्वभावोऽप्येकदेशभाक्।
सदृशोदाहृतिश्चातः प्रयत्नाद् व्यक्तिजन्मनः।।201।।
यन्नान्तरीयका सत्ता यो वात्मन्यविभागवान्।
स तेनाव्यभिचारी स्यादित्यर्थं तत्प्रभेदनम्।।202।।
संयोग्यादिषु येष्वस्ति प्रतिबन्धो न तादृशः।
न ते हेतव इत्युक्तं व्यभिचारस्य सम्भवात्।।203।।
सति वा प्रतिबन्धेऽस्तु स एव गतिसाधनः।
नियमो ह्यविनाभावोऽनियतश्च न साधनम्।।204।।

{'विवादाद् भेदसामान्ये' इत्यस्य व्याख्यानम्}

ऐकान्तिकत्वं व्यावृत्तेरविनाभाव उच्यते।
तच्च नाप्रतिबद्धेषु तत एवान्वयस्थितिः।। 205 ।।
स्वात्मत्वे हेतुभावे वा सिद्धे हि व्यतिरेकिता।
सिध्येदतो विशेषे न व्यतिरेको न वान्वयः*।। 206 ।। (पा0टि0-* चान्वयः-रा0)
अदृष्टिमात्रमादाय केवलं व्यतिरेकता।
उक्तोऽनैकान्तिकस्तस्मादन्यथा* गमको भवेत्।।207।।(पा0टि0- *उक्ताऽनैकान्तिक0-रा0।)

{साध्याभावः साधनाभावेन न व्याप्तः}

प्राणाद्यभावो नैरात्म्यव्यापीति विनिवर्त्तने।
आत्मनो विनिवर्त्तेत प्राणादिर्यदि तच्च न।।208।।
अन्यस्य विनिवृत्त्यान्यविनिवृत्तेरयोगतः।
तदात्मा तत्प्रसूतिश्चेत्? नैतद्; आत्मोपलम्भने।।209।।

तस्योपलब्धावगतावगतौ च प्रसिध्यति।
ते चात्यन्तपरोक्षस्य दृष्ट्यदृष्टी न सिध्यत:।।210।।
अन्यत्रादृष्टरूपस्य घटादौ नेति वा कुत:।
अज्ञातव्यतिरेकस्य व्यावृत्तेर्व्यापिता कुत:।।211।।
प्राणादेश्च क्वचिद् दृष्ट्या सत्त्वासत्त्वं प्रतीयते।
तथात्मा यदि दृश्येत सत्त्वासत्त्वं प्रतीयते।।212।।
यस्य हेतोरभावेन घटे प्राणो न दृश्यते।
देहेऽपि यद्यसौ न स्याद् युक्तो देहे न सम्भव:।।213।।
भिन्नेऽपि किञ्चित् साधर्म्याद् यदि तत्त्वं प्रतीयते।
प्रमेयत्वाद् घटादीनां सात्मत्वं किन्न मीयते।।214।।
अनिष्टेश्चेत् ? प्रमाणं हि सर्वेष्टीनां निबन्धनम्।
भावाभावव्यवस्थां क: कर्तुं तेन विना प्रभु:!।।215।।
स्मृतीच्छायत्नज: प्राणनिमेषादिस्तदुद्भव:।
विषयेन्द्रियचित्तेभ्य:; ता: स्वजातिसमुद्भवा:।।216।।
अन्योन्यप्रत्ययापेक्षा अन्वयव्यतिरेकभाक्।
एतावत्यात्मभावोऽयमनवस्थान्यकल्पने।।217।।
श्रावणत्वेन तत् तुल्यं प्राणादि व्यभिचारत:।
न तस्य व्यभिचारित्वाद् व्यतिरेकेऽपि चेत् कथम्।।218।।
नासाध्यादेव विश्लेषस्तस्य नन्वेवमुच्यते।
साध्येऽनुवृत्तयभावोऽर्थात् तस्यान्यत्राप्यसौ सम:।।219।।
असाध्यादेव विच्छेद इति साध्येऽस्तितोच्यते।
अर्थापत्तयाऽत एवोक्तमेकेनोभयदर्शनम्।।220।।
ईदृगव्यभिचारोऽतोऽनन्वयिषु न सिध्यति।
प्रतिषेधनिषेधश्च विधानात् कीदृशोऽपर:।।221।।
निवृत्तिर्नासत: साध्यादसाध्येष्वेव नो तत:।
नेति सैव निवृत्ति: किं निवृत्तेरसतो मता।।222।।
निवृत्तयभावस्तु विधिर्वस्तुभावोऽसतोऽपि सन्।
वस्त्वभावस्तु नास्तीति पश्य बान्ध्यविजम्भितम्।।223।।
निवृत्तिर्यदि तस्मिन्न हेतोर्वृत्ति: किमिष्यते।
सापि न प्रतिषेधोऽयं निवृत्ति: किं निषिध्यते।।224।।
विधानं प्रतिषेधं च मुक्त्वा शाब्दोऽस्ति नापर:।
व्यवहार: स चासत्सु नेति प्राप्तात्र मूकता।।225।।

सतां च न निषेधोऽस्ति सोऽसत्सु च न विद्यते।
जगत्यनेन न्यायेन नञर्थ: प्रलयं गत:।।226।।
देशकालनिषेधश्चेद् यथास्ति स निषिध्यते।
न तथा न यथा सोऽस्ति तथापि न निषिध्यते।।227।।
तस्मादाश्रित्य शब्दार्थं भावाभावसमाश्रयम्।
अबाह्याश्रयमत्रेष्टं सर्वं विधिनिषेधनम्।।228।।
ताभ्यां स धर्मी सम्बद्ध: ख्यात्यभावेऽपि तादृश:।
शब्दप्रवृत्तेरस्तीति सोऽपीष्टो व्यवहारभाक्।।229।।
अन्यथा स्यात् पदार्थानां विधानप्रतिषेधने।
एकधर्मस्य सर्वात्मविधानप्रतिषेधनम्।।230।।
अनानात्मतया; भेदे नानाविधिनिषेधवत्।
एकधर्मिण्यसंहारो विधानप्रतिषेधयो:।।231।।
एकधर्मिणमुद्दिश्य नानाधर्मसमाश्रयम्।
विधावेकस्य तद्वाजमिवान्येषामुपेक्षकम्।।232।।
निषेधे तद्विविक्तं च तदन्येषामपेक्षकम्।
व्यवहारमसत्यार्थं प्रकल्पयति धीर्यथा।।233।।
तं तथैवाविकल्पार्थभेदाश्रयमुपागता:।
आदिवासनोद्भूतं बाधन्तेऽर्थं न लौकिकम्।।234।।
तत्फलोऽतत्फलश्चार्थो भिन्न एकस्ततस्तत:।
तैस्तैरुपप्लवैर्नीतसञ्चयापचयैरिव।।235।।
अतद्वानपि सम्बन्धात् कुतश्चिदुपनीयते।
दृष्टिं भेदाश्रयैस्तेऽपि तस्मादज्ञातविप्लवा:।।236।।
सत्तासाधनवृत्तेश्च सन्दिग्ध: स्यादसन्न स:।
असत्त्वं वाभ्युपगमादप्रमाणं न युज्यते।।237।।
असतो व्यतिरेकेऽपि सपक्षाद् विनिवर्त्तनम्।
सन्दिग्धं तस्य सन्देहाद् विपक्षाद् विनिवर्त्तनम्।।238।।
एकत्र नियमे सिद्धे सिध्यत्यन्यनिवर्त्तनम्।
द्वैराश्ये सति दृष्टेषु स्यादृष्टेऽपि संशय:।।239।।
अव्यक्तिव्यापिनोऽप्यर्था: सन्ति तज्जातिभाविन:।
क्वचिन्न नियमोऽदृष्ट्या पार्थिवालोहलेख्यवत्।।240।।
भावे विरोधस्यादृष्टे: क: सन्देहं निवारयेत्।
क्वचिद् विनियमात् कोऽन्यस्तत्कार्यात्मतया स च।।241।।

नैरात्म्यादपि तेनास्य सन्दिग्धं विनिवर्तनम्।
अस्तु नाम तथाप्यात्मा नानैरात्म्यात् प्रसिध्यति।।242।।
येनासौ व्यतिरेकस्य नाभावं भावमिच्छति।
यथा नाव्यतिरेकेऽपि प्राणादिर्न सपक्षत:।।243।।
सपक्षाव्यतिरेकी चेद्धेतुर्हेतुरतोन्वयी।
नान्वयव्यतिरेकी चेदनैरात्म्यं सात्मकम्।।244।।
यन्नान्तरीयक: स्वात्मा यस्य सिद्ध: प्रवृत्तिषु।
निवर्त्तक: स एवात: प्रवृत्तौ च प्रवर्तक:।।245।।
नान्तरीयकता सा च साधनं समपेक्षते।
कार्ये दृष्टिरदृष्टिश्च कार्यकारणता हि सा।।246।।
अर्थान्तरस्य तद्भावेऽभावानियतोंऽगति:।
अभावासम्भवात् तेषामभवे नित्यभाविन:।।247।।
{सामग्रीशक्तिभेदाद् वस्तूनां नानात्मता}
कार्यस्वभावभेदानां कारणेभ्य: समुद्भवात्।
तैर्विना भवतोऽन्यस्मात् तज्जं रूपं कथं भवेत्।।248।।
सामग्रीशक्ति भेदाद्धि वस्तूनां विश्वरूपता।
सा चेन्न भेदिका प्राप्तमेकरूपमिदं जगत्।।249।।
भेदकाभेदकत्वे स्याद् व्याहता भिन्नरूपता।
एकस्य नानारूपत्वे द्वे रूपे पावकेतरौ।।250।।
तत् तस्या जननं रूपमन्यस्य यदि सैव सा।
न तस्या जननं रूपं तत् तस्या: सम्भवेत् कथम्।251।।
तत: स्वभावौ नियतावन्योन्यं हेतुकार्ययो:।
तस्मात् स्वदृष्टाविव तद् दृष्टे कार्येऽपि गम्यते।।252।।
एकं कथमनेकस्मात् क्लेदवद् दुग्धवारिण:।
द्रवशक्ते: यत: क्लेद: सा त्वेकैव द्वयोरपि।।253।।
भिन्नाभिन्न: किमस्यात्मा भिन्नोऽथ द्रवता कथम्।
अभिन्नेत्युच्यते बुद्धेस्तद्रूपाया अभेदत:।।254।।
तद्वद् भेदेऽपि दहनो दहनप्रत्ययाश्रय:।
येनांशेनादधद् धूमं तेनांशेन तथा गति:।।255।।
दहनप्रत्ययाङ्गादेवान्यापेक्षात् समुद्भवात्।
धूमोऽतद्व्यभिचारीति तद्वत् कार्यं तथापरम्।।256।।
धूमेन्धनविकाराङ्गतापदे दहनस्थिते:।

अनग्निश्चेदधूमोऽसौ सधूमश्चेत् स पावकः।।257।।
नान्तरीयकता ज्ञेया यथास्वं हेत्वपेक्षया।
स्वभावस्य यथोक्तं प्राग् विनाशकृतकत्वयोः।।258।।
अहेतुत्वगतिन्यायः सर्वोऽयं व्यतिरेकिणः।
अभ्यूह्यः श्रावणत्वोक्तेः कृताया साम्यदृष्टये।।259।।

{अनुपलब्धिविचारः}

हेतुस्वभावनिवृत्त यैवार्थनिवृत्तिवर्णनात्।
सिद्धोदाहरणेत्युक्तानुपलब्धिः पृथग् न तु।।260।।
तत्राप्यदृश्यात् पुरुषात् प्राणादेरनिवर्तनात्।
सन्देहहेतुताख्यात्या दृश्येऽर्थे सेति सूचितम्।।261।।
अनङ्गीकृतवस्त्वंशो निषेधः साध्यतेऽनया।
वस्तुन्यपि तु पूर्वाभ्यां पर्युदासो विधानतः।।262।।
तत्रोपलभ्येष्वस्तित्वमुपलब्धेर्न चापरम्।
इत्यज्ञज्ञापनायैकानुपाख्योदाहृतिर्मता।।263।।

{स्वभावानुपलब्ध्या विषयिप्रतिषेधः}

विषयासत्त्वतस्तत्र विषयि प्रतिषिध्यते।
ज्ञानाभिधानसन्देहं यथाऽदाहादपावकः।।264।।
तथान्या नोपलभ्येषु नास्तितानुपलम्भनात्।
तज्ज्ञानशब्दाः साध्यन्ते तद्भावात् तन्निबन्धना।।265।।
सिद्धो हि व्यवहारोऽयं दृश्यादृष्टावसन्निति।
तस्याः सिद्धावसन्दिग्धौ तत्कार्यत्वेऽपि धीध्वनी।।266।।
विद्यमानेऽपि विषये मोहादत्राननुब्रुवन्।
केवलं सिद्धसाधर्म्यात् स्मार्यते समयं परः।।267।।
कार्यकारणता यद्वत् साध्यते दृष्ट्यदृष्टितः।
कार्यादिशब्दा हि तयोर्व्यवहाराय कल्पिताः।।268।।
कारणात् कार्यसंसिद्धिः स्वभावान्तर्गमादियम्।
हेतुप्रभेदाख्याने न दर्शितोदाहृतिः पृथक्।।269।।
एकोपलम्भानुभवादिदं नोपलभे इति।
बुद्धेरुपलभे वेति कल्पिकायाः समुद्भवः।।270।।

{विशिष्टवेदनादेवार्थानां विशेषावगतिः}

विशेषो गम्यतेऽर्थानां विशिष्टादेव वेदनात्।
तथाभूतात्मसम्पत्तिर्भेदधीहेतुरस्य च।।271।।

तस्मात् स्वतो धियोर्भेदसिद्धिस्ताभ्यां तदर्थयो:।
अन्यथा ह्यनवस्थातो भेद: सिध्येन्न कस्यचित्।।272।।
विशिष्टरूपानुभवादन्यथान्यनिराक्रिया।
तद्विशिष्टोपलम्भोऽत: तस्याप्यनुपलम्भनम्।।273।।
तस्मादनुपलम्भोऽयं स्वयं प्रत्यक्षतो गत:।
स्वमात्रवृत्तेर्गमकस्तदभावव्यवस्थिते:।।274।।
अन्यथार्थस्य नास्तित्वं गम्यतेऽनुपलम्भत:।
उपलम्भस्य नास्तित्वमन्येनेत्यनवस्थिति:।।275।।

{दृश्यानुपलब्धि: सद्व्यवहारबाधिका}

अदृश्ये निश्चयायोगात् स्थितिरन्यत्र बाध्यते।
यथाऽलिङ्गोऽन्यसत्त्वेषु विकल्पादिर्न सिध्यति।।276।।
अनिश्चयफला ह्येषा नालं व्यावृत्तिसाधने।
आद्याधिक्रियते हेतोर्निश्चितेनैव साधने।।277।।
तस्या: स्वयं प्रयोगेषु स्वरूपं वा प्रयुज्यते।
अर्थबाधनरूपं वा भावे भावादभावत:।।278।।
अन्योन्यभेदसिद्धेर्वा ध्रुवभावविनाशवत्।
प्रमाणान्तरबाधाद् वा सापेक्षध्रुवभाववत्।।279।।

{भावस्वभावविचार:}

हेत्वन्तरसमुत्थस्य सन्निधौ नियत: कुत:।
भावहेतुभवत्वे किं पारम्पर्यपरिश्रमै:।।280।।
नाशनं जनयित्वान्यं स हेतुस्तस्य नाशक:।
तमेव नश्वरं भावं जनयेद् यदि किं भवेत्।।281।।
आत्मोपकारक: क: स्यात् तस्य सिद्धात्मन: सत:।
नात्मोपकारक: क: स्यात् तेन य: समपेक्ष्यते।।282।।
अनपेक्षश्च किं भावोऽतथाभूत: कदाचन।
यथा न क्षेपभागिष्ट: स एवोद्भूतनाशक:।।283।।
क्षणमप्यनपेक्षत्वे भावो भावस्य नेति चेत्।
भावो हि स तथा भूतोऽभावे भावस्तथा कथम्।।284।।
येऽपरापेक्षतद्भावास्तद्भावनियता हि ते।
असम्भवद्विबन्धा च सामग्री कार्यकर्मणि।।285।।

समाप्तं चेदं प्रमाणवार्त्तिकम्